# ORIENTAL INSTITUTE, BARODA.

Acc. No. 21810. Subject वेदान्त. गीता

Name अष्टावक्रगीता (with टीका).

Author

Age सं. १८४१. Extent पत्र. 1-60. ग्र. 400+ 500.

Language Sanskrit. Script Devanagari

Source:- Someshwar N. Pathak. Padra. Cost:- Gift.

Gift to Oriental Institute
From

ORIENTAL INSTITUTE,
M. S. UNIVERSITY,
BARODA-(INDIA)

श्रीकृष्णगोपालचैतन्येन रचितेन मया दीपिका टीका विर्यक्रीयते ॥ सकलविद्वज्जन कृपाकटाक्षसंतुष्टचेतसा मया विस्तार्य टीका क्रीयते इत्याध्याहार

ORIENTAL INSTITUTE,
M. S. UNIVERSITY,
BARODA-(INDIA)

अष्टावक्र ॥श्रीगणेशाय नमः॥ सच्चिदानंदमद्वैतं सर्वाधिष्ठानमुत्तमं ॥ नत्वाष्टावक्रसूक्तस्य दीपिका तन्यते परा ॥१
इह खलु ज्ञानसंपन्नः परमकारुणिको ष्टावक्रमुनिर्मुक्तिकामनया समुपेतं कंचिच्छिष्यं शमदमाद्यधिकार
स्वीकारोपदेश पूर्वकमात्मतत्वमुपदिशति ॥ मुक्तिमिछसीति ॥ तातेति ॥ सानुग्रहसंबोधने हे शिष्य चेत्त्वं
मुक्तिं सर्वार्थनिवृत्तिपरमानंदावाप्तिरूपां मिछसि तर्हि विषवत् ॥ यथा विषमनर्थहेतुत्वात्त्यज्यते ॥ त्यजे
जनक उवाच ॥ कथं ज्ञानमवाप्नोति कथं मुक्तिर्भविष्यति ॥ वैराग्यं च किं प्राप्तं च स तत्वं ब्रूहि मे प्रभो ॥१॥ अष्टावक्र उवाच
मुक्तिमिछसि चेत्तात विषयान्विषवस्त्यज ॥ क्षमार्जवदयातोषसत्यं पीयूषवद्भज ॥१॥ राम ॥

[तत्रा]
तथा विषयान् देहादीननर्थहेतुभूतांस्त्यज नाहं ममेत्यध्यासासक्तिं मा कार्षीरित्यर्थः ॥ अनेन बाह्यप
दमो दार्थानुषंगत्यागोपदेशेन बाह्येंद्रियनिग्रहरूपदमांगीकारमुपदिष्टः ॥ अर्थं तत्करणनिग्रहरूपशमां
गीकारमुपदिशति ॥ क्षमेति ॥ क्षमादिकं यथा पीयूषं अर्थदेतुत्वात्सेव्यते तथा सेवस्वेत्यर्थः ॥ यद्वा साधनच
तुष्टयंसंपन्नमधिकारिणं शिष्यं प्रति भगवानष्टावक्रो मुनिर्मुक्तिमुपदिशति ॥२॥ श्रीकृष्णाय नमः ॥ १

दमो बाह्येंद्रियसंयमः ॥ शमोंतःकरण निग्रहरूपशमांगीकारमुपदिशाती 3
संयमः पाठांतरानुषांगत्यागोपदेशेन 3

ननु पांचभौत्तिको देह एवात्मा तथा च भूतानां तद्धर्माणांच त्यागो न संभावितः ॥ न हि पृथिव्यादि नास्व
भावभूतो यं थ्यादिः कालत्रयेपि त्यज्यत इत्याशंक्य पृथिव्यादिरूपस्त्वं न भवसीत्याह ॥ न पृथ्वीत्ति ॥ हे शि
ष्य पृथिव्यप्तेजोवाय्वाकाशात्तद्धर्मरूपस्त्वं न भवसि तेन न स्वमनात्मधर्मान् विषयांस्सजेत्यर्थः ॥ नन्वहं
गौरः स्थूल इत्यादि प्रतीतेश्च भौत्तिको देह एवात्मेत्यत आह ॥ एषामिति ॥ एषां देहादीनां साक्षिणमेवा

न पृथ्वी न जलं नाग्निर्न वायुर्द्यौर्न वा भवान् ॥ एषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये ॥ २ ॥

त्मानं विद्धि साक्षात्कुरु ॥ तथा च देहादेः साक्षी आत्मा देहादिभ्यो भिन्नः ॥ यथा घटद्रष्टा घटाद्भिन्न इत्य
र्थः ॥ नैयायिकाभिमतं निराकरोति ॥ चिद्रूपमिति ॥ आत्मज्ञानस्य फलमाह ॥ मुक्तये इत्ति ॥ श्रीकृष्णा
य नमस्तुभ्यं भक्तानुग्रहकारणे ॥ तापत्रयनिहंत्राय वासुदेवाय ते नमः ॥ ५ ॥ आत्यंतिकी दुःखनि
वृत्तिर्मुक्तिरिति नैयायिकाः ॥ दुःखप्रागभावपरिपालनं मुक्तिरित्ति प्राभाकराः ॥ श्रीरामचंद्रः ॥

अष्टा० आत्मज्ञानं मुक्तिरिति बौद्धाद्यादिमतानि निराकुर्वन्नेवात्मज्ञानाज्जीवन्मुक्तिदशामाह ॥ यदीति ॥ हे शिष्य
२ यदि त्वं देहं पृथक्कृत्य देहादिभ्यो विविच्य चिति विश्रम्य चिदेकाग्रो भूत्वा तिष्ठसि ॥ तर्हि त्वं अधुनैव इदा विल ज्ञा २
नीं जीवद्दशायामेव सुखी प्राप्तपरमानंदः अत एव शांतः सुप्रसन्नमनाः बंधमुक्तः कर्तृत्वभोक्तृत्व रा

यदि देहं पृथक्कृत्य चिति विश्रम्य तिष्ठसि ॥ अधुनैव सुखी शांतो बंधमुक्तो भविष्यसि ॥ ३ ॥

प्रमुखानर्थरहितो भविष्यतीत्यर्थः ॥ ३ ॥ ननु वर्णाश्रमप्रयुक्तानि कर्माणि विहाय चिति विश्रम्यावस्था
नं कथं मुक्तमित्याशंक्यात्मा वर्णाश्रमिविलक्षण इत्याह ॥ न त्वमिति ॥ त्वं वर्णाश्रमिविलक्षण इत्यर्थः ॥

साक्षित्वादित्यर्थः ॥

नन्वहं ब्राह्मण इत्यादिचाक्षुषप्रत्यक्षबलादात्मैव वर्णाश्रमी चेत्याशंक्याह ॥ नाक्षगोचर इति ॥ अयं ब्राह्मण इत्यादि ॥ प्रत्ययास्तु देहगोचरा एव न त्वात्मगोचरास्तस्येंद्रियकज्ञानागोचरत्वादित्यर्थः ॥ तर्हि ना
कीदृशोहमित्याशंक्यात्मानं निरूपयन्नेव तद्विश्रांतिफलमनुवदति ॥ असंगस्सर्वोपाधिसंगर

न त्वं विप्रादिको वर्णो नाश्रमी नाक्षगोचरः ॥ असंगोसि निराकारो विश्वसाक्षी सुखी भव ॥ ५ ॥

हितः निराकारः विश्वसाक्षी त्वमसि ॥ अतश्चासंगादिरूपस्य तव वर्णाश्रमिविलक्षणत्वात्कर्मासक्तिं परिहाय चित्ते विश्रम्य सुखी प्राप्तपरमानंदो भवेत्यर्थः ॥ ५ ॥ राम ॥ ॥ श्री ॥ ॥ राम

अष्टा० ० २ द्रष्टा

ननु वेदोदितकर्म विहाय चित्तविश्रांतावपि प्रत्यवायप्रसंगः स्यात् अत आह ॥ धर्माधर्माविति ॥ धर्माधर्मादयो
मनोधर्मा एव कालत्रयेपि तैः सह तव संबंधो नास्तीत्यर्थः ॥ न कर्त्तेति ॥ किंच विहितनिषिद्धकर्मक
र्तृत्वं धर्मादिद्वारा सुखदुःखभोक्तृत्वं तदपि तव नास्ति ॥ शुद्धबुद्धस्वरूपत्वात्त्वं सर्वदा मुक्त एव ॥ अज्ञानमा
त्रेण विजृंभिष्यते इत्यर्थः ॥५॥ ननु शुद्धबुद्धस्वभावस्यैकस्य नित्यमुक्तस्यात्मनो बंधः ॥ किंनिबंधनो यस्य
विनितेबंधसुखदुःखेत्तुं हेतु चित्तविश्रांत्यैवाज्ञाननिवृत्त्यान ४

धर्माधर्मौ सुखं दुःखं मानसानि न ते विभो ॥ न कर्त्तासि न भोक्तासि मुक्त एवास्ति सर्वदा ॥५॥
एकोऽद्रष्टासि सर्वस्य मुक्तप्रायोसि सर्वदा ॥ अयमेव हि ते बंधो द्रष्टारं पश्यसीतरं ॥६॥ रामः ॥

बंधस्य निवृत्त्यर्थं विवेकिनो यतंतं इत्याशंक्य नित्यमुक्तस्यापि प्रातीतिकबंधहेतुमाह ॥ एक इति ॥ द्रष्टा
स्य सर्वस्य द्रष्टा प्रतिशरीरमेकस्त्वमसि न तन्त्र व्यापकत्वात्सर्वदा मुक्तप्रायोसि देहाध्यासवशात्तो बंधे प्रती तंबे
यमानेपि वस्तुगत्या मुक्तोसीत्यर्थः ॥ अयमिति ॥ हि निश्चितं ॥ अयमेव ते बंधो यदितरं देहादिरूपं परि तव
च्छिन्नं द्रष्टारं पश्यसीत्यर्थः ॥६॥ राम ॥

२

पूर्वबंधहेतुरुक्तः अथानर्थहेतुं वदन्नेव तन्निवृत्तिपरमानंदावाप्त्योरुपायमनुवदति ॥ अहं कर्तेति ॥ हे शि
ष्य अहं कर्तेत्येवंरूपो योऽहंमान अहमिति ॥ आत्मनि कर्तृत्वाभिमानस्तद्रूपो महान् कृष्णसर्पः सुखदु
ःखविषावहस्तेन दंशितः कवलीकृतोऽन्तःकरणे न कर्ता अहं न कर्ता आत्मा इत्येवंरूपविश्वासामृतं पी
त्वा अनुभूय सुखी भव प्राप्तपरमानंदो भवेत्यर्थः ॥ ७ ॥ ननु आत्मज्ञानामृतपानेन किं द्वारा सुखसाधनमित्या

अहंकर्तेत्यहंमानमहाकृष्णाहिदंशितः ॥ नाहं कर्तेति विश्वासामृतं पीत्वा सुखी भव ॥ ७ ॥ एको
विशुद्धबोधोऽहमिति निश्चयवह्निना ॥ प्रज्वाल्याज्ञानगहनं वीतशोकः सुखी भव ॥ ८ ॥ रामचंद्राय

शंक्याज्ञानकाननदहनद्वारा ज्ञानाग्निः सुखसाधनमित्याह ॥ एको विशुद्धबोधोऽहमिति ॥ एकः सजातीयविजा
तीयस्वगतभेदरहितः विशुद्धबोधः स्वप्रकाशचिदात्माहमिति निश्चयाग्निना अज्ञानाख्यं गहनं प्रज्वाल्य
प्रकर्षेण दग्ध्वा मोहरागद्वेषप्रवृत्तिजन्मा यः पापाद्वीतशोको विगतदुःखः सन् सुखी भवेत्यर्थः ॥ ८ ॥ ननु
ज्ञाने न अज्ञानदाहे सत्यपि सर्वस्य प्रपंचस्य ज्ञानादनिवृत्तेर्वीतशोकः ॥ श्री ॥ रामचंद्राय नमः ॥

अष्टा० कथंस्यादित्याशंक्यअपेत्युस्यरज्जुभुजंगतुल्यत्वात् ज्ञानाद्धिनिवृत्तोदुःखहेतोरभावाद्धीतत्रोक्तास्यादेवे
४ त्याह ॥ यत्रेति ॥ यत्रबोधेइदंविश्वंरज्जुसर्पवत्कल्पितं अधिष्ठानाज्ञानकल्पितंभाति ॥ सबोधस्त्रिदात्मा त्वंसु
खंचर ॥ यथास्वप्नदशायामज्ञानकल्पितंव्याघ्रादिकंज्ञानप्रबोधेति ॥ निवर्त्तसुखंचरतितद्वदित्यर्थः ॥ ननुदुः पश्यति
खहेतुप्रपंचनिवृत्तौदुःखाभावमात्रंस्यात्सुखंतुकथंस्यादित्याशंक्यस्वभावतएवत्वंनित्यानंदानंद

यत्रविश्वमिदंभातिकल्पितंरज्जुसर्प्पवत् ॥ आनंदपरमानंद सबोधस्त्वंसुखंचर ॥ १० ॥ राम ॥

स्वरूपइत्याह ॥ आनंदेति ॥ आनंदेभ्योमनुष्यलोकदेवलोकानंदेभ्यः परमउत्कृष्टः आनंदस्त्वमित्य
र्थः ॥ एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीतिश्रुतेः ॥ १ ॥ श्रीपरमात्मनेनमः ॥

ननु सर्वं रज्जुसर्पवत्कल्पितं स्वभावतस्त्वानंद एवात्मेति चेत्॥ तर्हि बंधमोक्षावात्मनः किंनिबंधनावित्याशंक्या
ह॥ मुक्ताभिमानीति॥ हि निश्चितं मुक्ताभिमान्येव मुक्तः॥ अपि च बद्धाभिमानी बद्धः॥ अत्र किंवदंतीं प्रमाणय
ति॥ किंवदंतीति यामितिः॥ सा गतिर्भवेत् इयं इह प्रसिद्धा किंवदंती विद्वज्जनश्रुतिसत्या अबाधितार्था॥
श्रुति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति परिगृहीतत्वात् यं यं वापि स्मरन् भावमित्यादिस्मृतिपरि

मुक्ताभिमानी मुक्तो हि बद्धो बद्धाभिमान्यपि॥ किंवदंतीह सत्येयं या मतिः सा गतिर्भवेत्॥११॥

गृहीतत्वाच्च तथा चाभिमानिकावेव बंधमोक्षौ न तु वास्तवावित्यर्थः॥ पूर्वं मुक्तोप्ययमर्थो दुर्बोधत्वा
त्पुनः पुनः शिष्यबोधार्थमुच्यते इत्यदोषः॥११॥ ननु जीवात्मनः पारमार्थिकावेव बंधमोक्षाविति ता
र्किकाशंकामपाकर्तुमाह॥ श्रीरामचंद्रायनमः॥ राम॥ ॥श्री॥ ॥राम॥

अष्टा० आत्मेति ॥ आत्मा भ्रमात् देहादावात्मतादात्म्यभ्रमात्संसारवानिव प्रतीयते न तु वस्तुतः संसारी ॥ अत्र
५ दत्राहेतुनाह ॥ साक्षीति ॥ कर्तुरहंकारादेः साक्षी न तु कर्त्ता विभुः विविधं भवत्यस्मादिति विभुः सर्वाधिष्ठानं
पूर्णः ॥ व्यापकः एकः सजातीयविजातीयस्वगतभेदरहितः ॥ मुक्तस्तत्त्वगम्यामायातत्कार्यातीतः ॥ चि
त्स्वप्रकाशः चैतन्यरूपः ॥ अक्रियः चेष्टारहितः ॥ असंगः सर्वसंबंधशून्यः ॥ असंगो ह्ययं पुरुष इति श्रुतेः ॥

आत्मा साक्षी विभुः पूर्ण एको मुक्तश्चिदक्रियः ॥ असंगो निस्पृहः शांतो भ्रमात्संसारवानिव ॥ १२ राम ॥

देहाद्यंतःकरणधर्मी

निस्पृहः ॥ विषयाभिलाषरहितः ॥ शांतः प्रवृत्तिनिवृत्ति रहितस्तस्माद्वस्तुतो न संसारीत्यर्थः ॥ १२
अहं परिच्छिन्नो ममेदं देहादिकं सुखी ॥ ॥ ब्रू ॥ ॥ राम ॥ ॥ श्री ॥ ॥ राम ॥ ॥ श्री ॥ ॥ राम ॥

दुःखी वाहमिति त्वमस्यानादि परंपरागतस्य सकृद्भावनया निवर्त्तयितुमशक्यत्वादीवृत्तिरसकृदुप
देश्यादिति व्यासस्त्रात्वं पुनः पुनः रा द्वैतात्मभावनां विजातीयभावनानिवृत्तिपुरस्सरामुपदिशति ॥ कू
टस्थमिति ॥ हे शिष्य आसोतोहं अहंकारोहमिति त्वमं मुक्त्वा बाह्यं भावं ममेदं देहादिकमिति बाह्यप
दार्थविषयं भावं ॥ अथचांतरं भावं सुखीदुःखी मूढोहमिति आवांतरपदार्थविषयं भावं । भावनां
भावनां मुक्त्वा ४

कूटस्थं बोधमद्वैतमात्मानं परीभावय ॥ आभासोहं त्वमं मुक्त्वा भावं बाह्यमथांतरम् ॥ १४ राम ॥

९ ई मुक्त्वा अकर्त्तारं कूटस्थमसंगं बोधस्वरूपमद्वैतमात्मानं परिसमंतात् । व्यापकं भावयेत्यर्थः ॥
१२ ॥ अनादिरयं देहाभिमानः सकृद्भावनया न निवर्त्तत इति पुनः पुनस्तं निरवछेनतन्निवर्त्तं सु
खी भवेत्याह ॥ रामवंद्राय नमः ॥ ॥ श्री राम ॥ ॥ राम ॥ ॥ श्री ॥ ॥ राम ॥

अष्टा० देहाभिमानेति ॥ हे पुत्रक शिष्य त्वं देहे अहमित्यभिमानपाशेन चिरं बहुकल्पं बद्धोसि ॥ अतो बोधो
६ हं चिद्रूपोहमिति ज्ञानखड्गेन पुनः पुनस्तं पाशं निष्कृत्य नितरां स्थित्वा सुखी भव ॥ १३ ॥ चित्तवृ
त्तिनिरोधरूपः समाधिरेव केवलो बंधनिवृत्तिहेतुरिति पातंजलमतमपाकर्तुमाह ॥ बू ॥

देहाभिमानपाशेन चिरं बद्धोसि पुत्रक ॥ बोधोहं ज्ञानखड्गेन तन्निष्कृत्य सुखी भव ॥ १३ ॥ निः
संगो निःक्रियोसि त्वं स्वप्रकाशो निरंजनः ॥ अयमेव हि ते बंधः समाधिमनुतिष्ठसि ॥ १४ ॥ राम ॥

निःसंगइति ॥ हे शिष्य त्वं वस्तुतो निःसंगः सर्वसंबंधशून्योसि ॥ तथा क्रियारहितोसि ॥ अत्र हेतुमाह ॥
स्वप्रकाशो निरंजन इति निष्क्रियस्य समाध्यनुष्ठानं यत् अयमेव हि निश्चितं ते बंधः ॥ तथा च ज्ञाना
या त्तिरिक्तो याऽनुष्ठानमात्रं प्रत्यक्षत बंध एवेत्यर्थः ॥ १४ ॥ श्रीकृष्णाय नमः ॥ परमात्मने नमः ॥ ६

तदेवमात्मज्ञानातिरिक्तः समाधिरपि पूर्वं निराकृतः ॥ अथ परिपूर्णशुद्धबुद्धात्मनि विपरीतधि-
यमुत्सारयन्नेव चित्तनिष्ठामुपसंहरति श्लोकद्वयेन त्वयेति ॥ हे शिष्य इदं विश्वं त्वया व्याप्तं कनके
यथ नेव कटककुंडलादिकं ॥ तथा इदं विश्वं त्वयि प्रोतं मृदा त्वं च घटशरावादिकं ॥ हे शिष्य त्वं यथार्थतः ॥
प्र परमार्थतः शुद्धः ॥ अविद्यातत्कार्यप्रपंचातीतः बुद्धः स्वप्रकाशचिद्रूपोसि ॥ एवं च सर्वगंधः सर्वरसो

त्वया व्याप्तमिदं विश्वं त्वयि प्रोतं यथार्थतः ॥ शुद्धबुद्धस्वरूपस्त्वं मागमः क्षुद्रचित्ततां ॥ १५ राम ॥

नेति नेतीत्यत्र चेति श्रुतिद्वयानुसारेणोक्ताभ्यां समध्यारोपापवादाभ्यां निष्प्रपंचमात्मतत्त्वमुपदिष्टं भ-
ति वती ॥ हे शिष्य परिपूर्णः शुद्धबुद्धस्वरूपस्त्वं क्षुद्रचित्ततां विपरीतचित्तवृत्तिं मागमः मा कार्षीरित्यर्थः ॥ १५ ॥
प्रतीयमानाः षडूर्मयः षड्भावविकारान् त्वजं तास्त्वं तु न छिन्नत्क्षण इत्याह ॥ निरपेक्ष इति ॥ हे
शिष्य त्वं निरपेक्षः अशनायापिपासादिषडूर्मिसंसर्गातीतः ॥ राम ॥ श्री ॥ राम ॥

अष्टा० तथानिर्विकारः जायतेस्तिवर्द्धतेविपरिणमते ॥ अपक्षीयतेनश्यतीत्येतंविधायास्कादिप्रोक्ताः ष वि ।
७ ड्भावविकारास्तत्संसर्गरहितस्त्वमित्यर्थः ॥ तर्हिकीदृशोहमस्मितत्राह ॥ निर्भरइति ॥ निर्भरश्चिद्घ
नरूपः शीतलः सुखरूपः ॥ आमुक्तिसमयमभिव्याप्यशेतेतिष्ठतीत्याशयः ॥ अगाधा अतलस्प अ
र्शा अपरिच्छिन्ना बुद्धिः स्वरूपचैतन्यंतद्रूपः ॥ अक्षुब्धः अविकृतः क्षोभरहितस्त्वंवस्तुतोसित्र

निरपेक्षोनिर्विकारोनिर्भरः शीतलाशयः ॥ अगाधबुद्धिरक्षुब्धोभवचिन्मात्रवासनः ॥१६॥

तस्त्वंक्रियामात्ररहितश्चिन्मात्रनिष्ठोभवेत्यर्थः ॥१६॥ विषयान्विषवत्त्यजसत्संपीयूषवद्भजेति
मोक्षोपायः । प्रथमश्लोके । उपदिष्टः परंतुविषयाणांविषतुल्यत्वेसत्यात्मनः । पीयूषतुल्यत्वेच
हेतुर्नोक्तोतस्तत्रहेतुंपदन्नेवषोडशश्लोकोपदेशोमोक्षहेतुश्चिदात्मा ॥ रामचंद्रायनमः ॥ ७

अदर्श १

यस्याध्यस्तं विश्वं समंततो व्याप्यावस्थितो मुकुर इव स्वाध्यास्तं विश्वं शरीरं इति तज्ज्ञानोपपत्तिरेव परमपुरुषा
र्थ इत्युपपत्तिमुखेन प्रकरणार्थं संगृह्णाति श्लोकत्रयेण ॥ अथ संग्रहश्लोकाद्व्यादिना ॥ हे शिष्य साका
रं शरीरादिकं अनृतं मिथ्याभूतं विद्धि अनृतस्त्वद्विषवत् त्यजेत्यर्थः ॥ निराकारमात्मानं तत्त्वं निश्चलं

अथ संग्रहश्लोकः ॥ साकारमनृतं विद्धि निराकारं तु निश्चलं ॥ एतत्तत्त्वोपदेशेन न पुनर्भवसं
भवः ॥ १ राम ॥

॥ कालत्रयावस्थायि विद्धि ॥ सर्वसाक्षित्वान्नित्यं विज्ञानमानंदं ब्रह्मेति श्रुते ॥
श्च ॥ अत एतत्तत्त्वे चिन्मात्रे उपदेशेन उपादिश्यमानेन तत्रैव विश्रम्यावस्थानेन न पुनर्भवस्य मो
त्तस्य संभवः सिद्धिरित्यर्थः ॥ २ ॥ अथ वर्णाश्रमधर्मस्थूलेत्रा ॥ रामचंद्राय नमः ॥ श्री ॥

अष्टा० रीरान्पुण्यापुण्यधर्मकलिंगशरीराराद्विलक्षणं परिपूर्णं चैतन्यं सदृष्टं तं निरूपयति ॥ यथैवे
८ ति ॥ यथैवादर्शप्रतिबिंबिते शरीरादौ अंतर्मध्ये परितो बहिश्च सत्त्वादर्शो व्याप्य वर्त्तते ॥ तथैव

यथैवादर्शमध्यस्थे रूपेंतः परितस्तु सः ॥ तथैवास्मिन्शरीरें तः परितः परमेश्वरः ॥ २ ॥ राम ॥

वस्त्राद्यस्ते अस्मिन्स्थूले शरीरे अंतः परितश्च परमेश्वरश्चिदात्मा व्याप्य स्थितः ॥ तथा च यत्र वि
श्वमिदं भाति कल्पितं रज्जुसर्पवदित्यादि सर्वोपि प्रकरणार्थः ॥ संक्षेपतः सूचितः ॥ २ ॥ श्रीकृष्णः ॥ ८

आदर्शे दृष्टांते परिछिन्नत्वादिभ्रमापत्तिः स्वाध्यस्तशरीरांतर्वर्तित्वं च न स्पष्टमतो घटाकाशदृष्टांतेन
बाह्याभ्यंतरव्यापकत्वमाह ॥ एकं सर्वगतमिति ॥ यथा सर्वगतमेकं नित्यं व्योम घटे पटादौ बहिरंत
श्च वर्त्तते तथा नित्यं अविनाशि ब्रह्म सर्वभूतगणे बहिरंतश्च निरंतरं सर्वदा वर्त्तत इत्यर्थः ॥ एष
त आत्मा सर्वस्यांतर इति श्रुतेः ॥ अतश्च बोधोहं ज्ञानखड्गेन देहोहं भावपाशं निकृत्य सुखी भ

एकं सर्वगतं व्योम बहिरंतर्यथा घटे ॥ नित्यं निरंतरं ब्रह्म सर्वभूतगणे तथा ॥२॥ रस्तुपदेश॥

वेत्यर्थः ॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायामात्मानुभवोपदेशप्रकरणं ॥१॥ इत्थं
गुरूक्तिपीयूषास्वादानुभवमात्मनः ॥ आविष्कारमाश्चर्यं शिष्यो निजगुरुं प्रति ॥२॥ तत्रावछिष्य
चिद्रूपात्मानुभावमाविष्कुर्वन्नेव गुरुकृतोपकारख्यापनाय प्राचीनसंस्कारवशात् बाधितानु
रामचंद्राय नमः ॥

अ॰ष्टा॰ वृत्याप्रतीतस्य मोहं विडंबनस्य स्मरणमाविष्करोति ॥ अहो इति ॥ अदृष्टस्याद्भुतस्यानुभवादहो इत्याश्चर्येऽ
६ हं निरंजनः सर्वोपाधिविनिर्मुक्तः शांतः सर्वविकारातीतः प्रकृतेः परो मायांधकारस्पर्शशून्यो बोधः स्व
प्रकाशचिद्रूप इत्यर्थः ॥ गुरूपकारख्यापनाय मोहविडंबनमनुस्मरति ॥ एतावंतमिति ॥ एतावं
तं गुरूपदेशाविधिकं कालं मोहेन देहात्माविवेकेन विडंबित एव सांप्रतं तु श्रीगुरुप्रसादादा

अहो निरंजनं शांतो बोधोहं प्रकृतेः परः ॥ एतावंतमहं कालं मोहेनैव विडंबितः ॥ १ ॥ राम ॥

त्मानंदात्मानुभवोस्मीति विवृद्धितेऽत्यर्थः ॥ पूर्वकालीनं मोहं विडंबनमुक्तं ॥ संप्रति गुरुप्रसा
दान्मम देहात्मविवेकोस्तीति सोपपत्तिकमाह ॥ यथेति ॥ अहं यथा जगत्प्रकाशयामि त
थैव एनं स्थूलं देहं प्रकाशयामि ॥ तथा च देहो नात्मा प्रकाशत्वाज्जगद्वदित्यर्थः ॥ कस्तर्हि जगदा ६

इत्याशंक्य युक्तिविचाराद् आध्यासिकः संबंधः    यथा सुवर्णकुंडलादेः १

द्दिदेहात्मनोः संबंध इत्याशंक्य युक्तिविचाराद् आध्यासिकः संबंधः । परमार्थगत्या च न कश्चित्संबंध इत्याह ॥ अतो मम
मेति ॥ अतो हेतोरयं त्वामर्वं देहप्रमुखं जगत् मम मदीयं मय्यध्यस्तमित्यर्थः ॥ चोऽवधारणे अथवा परमार्थविचारे किं    वि २
चन ॥ किमपि देहादिकं मम न च नैव मय्यध्यस्तमित्यर्थः ॥ तदेवमध्यारोपापवादाभ्यां प्रकृते पाठे बोधोऽहमित्ये
वात्र स्फुटीकृतं ॥ २ ॥ ननु लिंगदेहकारणदेहाद्यविवेकाभावे कथं प्रकृत्यतिरिक्तात्मबोध इत्याशंक्य

यथाऽत्र कल्पनायामेको देह मे नंत तथा जगत् ॥ अतो मम जगत्सर्वमथवा च न किंचन ॥ २ ॥ सशरीरमहो विश्वं परित्यज्य मयाधुना ॥ कुतश्चित्कौशलादेव परमात्मा विलोक्यते ॥ ३ ॥ राम ॥

ततोऽपि विवेकजन्यमात्मानुभवमाह ॥ सशरीरमिति ॥ अहो इत्याश्चर्यं सशरीरं लिंगशरीरकारणशरीरसहितं विश्वं परित्यज्य विचारतः पृथक् सत्तया विविच्य कुतश्चित् शास्त्राचार्योपदेशान्न्यकौशलादनुचर्यादेव परमः श्रेष्ठ आत्मा मया विलोक्यते ॥ नान्यः परमात्मविलोकनोपाय इत्यर्थः ॥ ३ ॥
श्रीरुक्मायनमः ॥ ॥ राम ॥ ॥ श्री ॥ ॥ राम ॥ ॥ श्री ॥ ॥ राम ॥

अष्टा० सशरीरविश्वस्य दृश्यकस्तन्नयापरित्यजतं सदृष्टांतं निरूपयति ॥ यथा न तोयत इति । यथा तरंगा फेनबु
१० द्बुदाश्च न तोयतो भिन्नास्तदुपादानत्वात् तथा आत्मविनिर्गतं आत्मनो नं संजातं आत्मोपादनकं विश्वं आत्म
नो न भिन्नं एवं च तोयतरंगादिषु जलं यथा स्वच्छमनुगतं तथा स्वच्छचिद्रूपोहं विश्वस्मिन्नधिष्ठानभूतो
तो न मत्तोन्यद्विश्वमित्यर्थः ॥ ४ ॥ सदृष्टांतां तं तरेणात्मरूपतया सर्वावलोकनं निरूपयति ॥ तंतुमात्र

यथा न तोयतो भिन्नास्तरंगाः फेनबुद्बुदाः ॥ आत्मनो न तथा भिन्नं विश्वमात्मविनिर्गतं ॥ ४ ॥

ति ॥ स्थूलदृष्ट्या तंतुर्वैलक्षण्येन प्रतीयमानोपि पटो विचारितो विचारदीक्षितः सन् यद्वत् यथा तंतु
मात्रो भवेत् ॥ अस्ति तद्वत् तथा इदं स्थूलदृष्ट्या आत्मवैलक्षण्येनापि प्रतीयमानं युक्त्या विचारितं स विश्वं
न् आत्मतत्त्वमात्रमेव आत्मसत्तामात्रं ॥ ॥ श्रीकृष्णाय नमः ॥ श्री ॥ ॥ राम ॥ ॥ चंद्रः ॥ १०

त्मकमेवए तेन तंतुं स्वसत्तया पटेनुगतस्तथा । त्मापि स्वसत्तयाधिष्ठानभूतो विश्वस्मिन्ननुगत इत्यर्थः ॥
५ ॥ आत्मनैव सर्वं व्याप्तमित्यत्र दृष्टांतांतरमाह ॥ यथैवेति । यथैव इक्षुरसे क्लृप्ता मध्यस्था शर्करा तेन
न मधुररसेन व्याप्तैव सर्वापि व्याप्ता । तथैव मयि नित्यानंदस्वरूपे क्लृप्तं मध्यस्थं विश्वं मया नि-

तंतुमात्रो भवेदेव पटो यद्वद्विचारितः ॥ आत्मतन्मात्रमेवेदं तद्वद्विश्वं विचारितं ॥ ५ ॥ यथैवे-
क्षुरसे क्लृप्ता तेन व्याप्तैव शर्करा ॥ तथा विश्वं मयि क्लृप्तं मया व्याप्तं निरंतरं ॥ ६ ॥ श्रीकृष्णाय ॥

त्यानंदेन निरंतरं बाह्याभ्यंतरं व्याप्तं तस्माद्विश्वमानंदात्मस्वरूपमेवेत्यर्थः ॥ तदेवमस्ति भाति प्रियमि-
त्येकरूपेणाहमेव सर्वत्रावस्थित इति श्लोकत्रयविवक्षितेत्यर्थः ॥ ६ ॥ विश्वं चिदात्मनो न भिन्नं तर्हि के-
न कारणेनेदं भासते केन च कारणेन न भासत इत्याशंक्याह । राम ॥ ॥ श्री ॥ ॥ राम ॥

अष्टा० ९ आत्माज्ञानादिति ॥ आत्मनः अज्ञानात् जगद्भाति ॥ तथा आत्मनः अधिष्ठानस्य ज्ञानान्न भासते ॥ अधि
११ भा ष्ठानाज्ञानादन्यस्य [illegible]वे अधिष्ठानज्ञानाच्च भावे लोकप्रसिद्धं दृष्टांतमाह ॥ रज्ज्वज्ञानादिति हि यथा रज्जुस्वरू
पस्याज्ञानात् अहिः सर्पो भाति ॥ तत् ज्ञानाद्रज्जुज्ञानान्न भासते ॥ ७ ॥ ननु आत्मनः अज्ञाने सति आत्म
प्रकाशाभावाज्जगत्कथं भासत इत्याशंक्य स्वरूपचैतन्यबलादेवेत्याह ॥ प्रकाश इति ॥ प्रकाशो नित्यबोधः

आत्माज्ञानाज्जगद्भाति आत्मज्ञानान्न भासते ॥ रज्ज्वज्ञानादहिर्भाति तज्ज्ञानाद्भासते न हि ॥ ७ ॥
प्रकाशो मे निजं रूपं नातिरिक्तोस्म्यहं ततः ॥ यदा प्रकाशते विश्वं तदाहं भास एव हि ॥ ८ ॥ राम ॥

मे मम निजं स्वाभाविकं स्वरूपं ॥ अहं ततः प्रकाशात् अतिरिक्तः भिन्नो नास्ति अतो मम यदा विश्वं प्रकाशते त
दा अहं भासः मदात्मप्रकाशादेव भासते स्वरूपचैतन्यं चेद्भासकं तदा कथमज्ञानमिति चेत् ॥ मैवं नहि स्वरूपचै
तन्यमज्ञानविरोधि ॥ किंत्वज्ञानसाधकमेव ॥ अन्यथा जडस्य सिद्धिरेव न स्यात् ॥ किं चात्मस्वरूपप्रकाशाभावे
स्यात्मनोप्यसत्त्वप्रसक्तिर्जगदांध्यप्रसंगश्च ॥ तस्माद्यदा विश्वं प्रकाशते तदात्मस्वरूपप्रकाशादेवेति भावः ॥ ८ ॥ ११

स्वप्रकाशोप्यात्मनि अज्ञानवशाद्विश्वं भासते इति महदाश्चर्यं सदृष्टांतमाह ॥ अहो इति ॥ स्वप्रकाशोपि मयि
अज्ञानाद्विकल्पितं रचितमध्यस्तं विश्वं मयि भासते ॥ अहो आश्चर्यमिदं यथा शुक्त्यादौ रूप्यादिकं भासते तद्वदि
त्यर्थः ॥ ९ ॥ ननु मायाया विकारित्वात्तत्रैव विश्वमुत्पद्यते तत्रैव लयमेति ननु चैतन्यप्रकाशात्मनीति सांख्यमतमपा
कर्तुमाह ॥ मत्तो विनिर्गतमिति । इदं विश्वं मत्त एव विनिर्गतं । मय्येव लयमेष्यति प्राप्स्यतीति ॥ यथा मृदादौ कुंभा

अहो विकल्पितं विश्वमज्ञानान्मयि भासते ॥ रूप्यं शुक्तौ फणी रज्जौ वारि सूर्यकरे यथा ॥ ९ ॥ मत्तो
विनिर्गतं विश्वं मय्येव लयमेष्यति ॥ मृदि कुंभो जले वीचिः कनके कटकं यथा ॥ १० ॥ रामः ॥ बू ॥

दिस्तद्वदित्यर्थः ॥ न चात्र प्रमाणाभाव इति शंकनीयं ॥ यतो वा इमानि भूतानि जायंते येन जातानि
जीवंत्यलयंत्यभिसंविशंतीति श्रुते ॥ १० ॥ ननु ब्रह्म चेज्जगदुपादानकारणं तर्हि तस्य विका
रित्वान्मृदादिवद्विनाशित्वापत्तिरित्याशंक्याह ॥ राम ॥ . . ॥ श्री ॥ ॥ राम

अष्टा०
१२

अहो अहमिति । अहो आश्चर्यरूपोऽहं । यस्य मम सर्वोपादानभूतस्यापि विनाशो नास्ति । नन्वोपादा
नत्वे सुवर्णादिवद्विनाशित्वापत्तिः सुवर्णादिवद्विकारित्वापत्तिः सुवर्णादिवद्विकारित्वानंगीकारात् ।
विवर्ताधिष्ठानत्वे नैवोपादानत्वस्वीकारात् । अत एवाशेषकार्योपादानत्वाद्विनाशिने सर्वोत्कृष्टा

अहो अहं नमो मह्यं विनाशो यस्य नास्ति मे । ब्रह्मादिस्तंबपर्यंतं जगन्नाशोऽपि तिष्ठतः ॥ ११ ॥ राम

यमह्यं नमः । ब्रह्मादिदेवताचतुःप्रलये विनाशशंकां निराकरोति । ब्रह्मादीति । ब्रह्मादिस्तंबपर्यं
तं यत् जगत् तस्य नाशेऽपि तिष्ठतः । प्रलयेऽपि स्थितिमतो यस्य मे नाशो नास्तीत्यर्थः ॥ ११ ॥ स संज्ञा
न मनं ते ब्रह्मेति श्रुतेः ॥ नन्वज्ञानसामान्नानात्वयाहंकाररूपत्वात्तत्त्वेशगमनागमनवानिसाशंक्याह ॥

१२

अहो अहमिति ॥ अहो आश्चर्यरूपोहं । आश्चर्यरूपाय मह्यं नमः ॥ आश्चर्यरूपत्वमेवाह । एकोहमिति ॥
नानासुखदुःखावच्छेदकदेहवानप्यहमेक एव ॥ यथा नानासकंपनिष्कंपत्वावच्छेदकजलोपाधिवान
पि भानुरेक एवेत्यर्थः ॥ क्वचिदिति ॥ विश्वं व्याप्य स्थितः परिच्छिन्नाहंकारविलक्षणोहं क्वचिदपि न गं
ता कुतोपि नागंतावेत्यर्थः ॥ १२ ॥ नन्वात्मा न निःसंगः शरीरसंसर्गितया जगद्विधारकत्वादित्याशंक्या

अहो अहं नमो मह्यं मेकोहं देहवानपि ॥ क्वचिन्न गंता नागंता व्याप्य विश्वमवस्थितः ॥ १२ ॥
अहो अहं नमो मह्यं दक्षो नास्तीति मत्समः ॥ असंस्पृश्य शरीरेण येन विश्वं चिरं धृतं ॥ १३ ॥ रामः ॥

ह ॥ अहो अहमिति । अथमपादार्थः पूर्ववत् । इति कारणान्मत्समो दक्षः । असंगा व्यकार्यविधान
चतुरः कोपि नास्ति येन हेतुना शरीरेण असंस्पृश्य प्रपंचघटपिंडेनोन्मुकवदसंबाध्यैव चिरं बहुका
लं विश्वं स्थावरजंगमं । मया धृतं ॥ १३ ॥ राम ॥ श्री ॥ राम ॥ श्री ॥ कृष्णः ॥

नन्वसंबद्धस्य न जगद्धिधारकत्वं संबद्धस्यैव मित्यादेर्गृहादिधारकत्वादित्याशंक्याह ॥ अहो अहम्मि
ति ॥ अहो आश्चर्यरूपोहं तस्मै मे नमः । यस्य मे संबंधि परमार्थगत्या किंचन किमपि नास्ति ॥ परमा
र्थसतो द्वितीयस्यैवाभावात ॥ अथवा यत्तु यावत् वाङ्मनसगोचरं तावत्सर्वं यस्य मे मम संबंधि

अहो अहं नमो मह्यं यस्य मे नास्ति किंचन ॥ अथवा यस्य मे सर्वं यद्वाङ्मनसगोचरं ॥ २४ ॥

मिथ्यातादात्म्यसंबंधस्सुवर्णे कुंडलादिवदित्यर्थः ॥ अत एव सर्वसंबंधित्वादप्यात्माश्चर्यरूपा
य मह्यं नमइत्यर्थः ॥ २४ ॥ ननु त्रिपुटीरूपसंसारस्य पारमार्थिकत्वात्कथं मिथ्यातादात्म्यसंबं
धो जगदात्मनोरित्याशंक्याह ॥ ज्ञानं ज्ञेयं तथा ज्ञाता इत्यादिकं त्रितयं त्रिपुटीरूपं सर्वं वास्त

वं पारमार्थिकं नास्ति। यत्र मयीदं त्रितयं अज्ञानादनिर्वचनीयाज्ज्ञानान्मिथ्यातादात्म्ये नाध्यस्तं भाति॥ अत
एव स्वकृत्याहं निरंजनः प्रपंचमलसंबंधशून्योस्मीत्यर्थः॥१५॥ ननु निरंजनस्य कथं दुःखसंबंध इत्याशंक्या
द्वैतभ्रांतिमूलक एवासौ न[illegible]इत्याह॥ द्वैतमूलमिति॥ अहो आश्चर्ये निरंजनस्याप्यात्मनः द्वैतमूलं
दुःखं द्वैतभ्रमाख्यो दुःखाध्यासो न तु वास्तवं दुःखमित्यर्थः॥ दुःखाध्यासमहाव्याधेः किं भेषजमित्याशं

ज्ञानं ज्ञेयं तथा ज्ञाता त्रितयं नास्ति वास्तवं॥ अज्ञानाद्भाति यत्रेदं सोहमस्मि निरंजनं॥१५॥ द्वैतमू
लमहो दुःखं नान्यत्तस्यास्ति भेषजं॥ दृश्यमेतन्मृषा सर्वमेकोहं चिद्रसोमलः॥१६॥ रामचंद्रः॥

क्याह॥ नान्यदिति॥ अमलो मायातत्कार्यातीतश्चिद्रस चिन्मात्रस्वरूप एकोहं एतत्प्रतीयमानं स
र्वं दृश्यं जडजातं मृषा मिथ्या[illegible]न पारमार्थिकमिति बोधादन्यत्तस्य त्रिविधदुःखव्याधेर्भेषजं ना
स्तीत्यर्थः॥१६॥ नन्वयं द्वैतप्रपंचाध्यासः किं निमित्तः किमुपादानक इत्याशंक्याह॥ बोधेति॥ बोध
मात्रश्चिदेकस्वरूपोहमेव पारमार्थिकः। मया सर्वोपादानभूतेन कर्त्राऽज्ञानादखंडाज्ञानरू

पान्निमित्तादहंकारप्रमुखउपाधिर्द्वैतप्रपंचः कल्पितः एवं विचारस्य फलमाह ॥ एवमिति । एवं नित्यं वि
मृशतो विचारयतो मम निर्विकल्पे निरस्तद्वैते स्वरूपचैतन्ये स्थितिः प्राप्तिर्जाता ॥ १७ ॥ ननु स्वरूपचैतन्यप्रा
प्तिरूपा मुक्तिः प्रागुक्तविचारजन्या चेत्तदा मुक्तेर्विनाशापत्तिः । जन्यभावस्य विनाशित्वनियमात् विचाराज
न्या चेत्तदा विचाररहितानामपि मोक्षापत्तिरित्याशंक्याह । अहो इति ॥ वस्तुतो मे मम बंधो नास्ति न च मोक्षो

बोधमात्रोऽहमज्ञानादुपाधिः कल्पितो मया ॥ एवं विमृशतो नित्यं निर्विकल्पे स्थितिर्मम ॥ १७ ॥ अहो म
यि स्थितं विश्वं वस्तुतो मयि न स्थितं ॥ न मे बंधोऽस्ति मोक्षो वा भ्रांतिः शांता निराश्रया ॥ १८ ॥ रामः

प्यास्ति नित्यचिद्रूपत्वात् । तर्हि शास्त्रविचारस्य किं फलमित्याशंक्य भ्रांतिनिवृत्तिरेव तत्फलमित्याह ॥ अ
हो मयीति ॥ अहो आश्चर्ये मयि स्थितं मय्यपि विश्वं वस्तुतः ॥ कालत्रयेऽपि मयि न स्थितमिति विचारतो भ्रांति
रेव शांता ननु परमानंदावाप्तिर्जनिता आत्मनः सर्वदा परमानंदरूपत्वात्कीदृशी भ्रांतिर्निराश्रया उक्तवि
चारादज्ञानस्य नष्टत्वान्निर्मूलेत्यर्थः ॥ १८ ॥ न त्वधिष्ठानस्योपादानस्य सत्वान्मुक्तेऽप्यपि प्रपंचोदयः स्यादित्या

शंक्याह ॥ सशरीरमिति ॥ शरीरसहितमिदं विश्वं न किंचित् सत्यं ना[illegible]सत्समिति । निश्चितं नेह नानास्ति पप
किंचनेति श्रुते ॥ आत्मा च चिन्मात्रः शुद्धः मायामलशून्यः तत्तस्मात् कारणात् । अधुनात्मज्ञानोनिवृत्तौ
सत्यां कस्मिन् अधिष्ठाने विश्वकल्पना स्यात् । न कस्मिन्नपीत्यर्थः ॥१९॥ ननु सर्वस्याप्रपंचस्यावास्तवत्वे व
र्णजात्याश्रयं शरीरमप्यवास्तवमेवेति शरीरविशेषमधिकृत्य प्रवर्त्तमानविधिनिषिद्धशास्त्रमप्यवास्तवं स्या

सशरीरमिदं विश्वं न किंचिदिति निश्चितं ॥ शुद्धचिन्मात्र आत्मा च तत्कस्मिन् कल्पनाधुना ॥१९॥
शरीरं स्वर्गनरकौ बंधमोक्षौ भयं तथा । कल्पनामात्रमेवैतत् किं मे कार्यं चिदात्मनः ॥२०॥ राम ॥

त् तथा च तद्बोधितस्वर्गनरकयोरप्यवास्तवत्वात् स्वर्गादावनुरागो नरकादिभ्यश्च भयं न स्यात् । किंच शास्त्रबो
धितौ बंधमोक्षावप्यवास्तवौ न स्यातामित्याशंकेष्टापत्त्या परिहरति । शरीरमिति । शरीरादिकमेतत्कल्पना
मात्रमेव चिदात्मनः सच्चिदानंदरूपस्य मम एतैः शरीरादिभिः किमपि कार्यं साध्यं विधिनिषेधादिकं तु अ
विद्यावंतमेवाधिकृत्य प्रमाणमित्यर्थः ॥२०॥ स्वर्गादिभिः मे कार्यमिति प्रागुक्तं अथेहलोकेनापि कार्यं कं

अष्टा० नास्ती त्याह । अहो जनेति । न द्वैतं पश्यतो मम अहो ऽस्माश्चर्ये जनसमूहे ऽपि अरण्यमिव संवृत्तं संजातं तस्मा
२५ त् अहं मिथ्यातत्वे क्व रतिं प्रीतिं करवाणि न क्वापीत्यर्थः ॥ २१ ॥ ननु शरीरस्याहं ममतास्पदतयानुरागविषयत्वाद
हंकारस्याप्यहंतास्पदतयानुरागविषयत्वात्तत्र स्पृहा स्यादित्याशंक्याह ॥ नाहमिति ॥ देहो नाहं जडत्वात् नापि ऽप्यहं
मे देह । ममास्ति संगत्वात् जीवोऽहंकारो नाहं ॥ कर्तृत्वात् ॥ आत्मनश्चाकर्तृत्वात् ॥ कस्तर्हि त्वमित्याशंक्याह ॥

अहो जनसमूहेऽपि न द्वैतं पश्यतो मम ॥ अरण्यमिव संवृत्तं क्व रतिं करवाण्यहम् ॥ २१ ॥ नाहं देहो
न मे देहो जीवो नाहमहं हि चित् ॥ अयमेव हि मे बंध आसीद्या जीविते स्पृहा ॥ २२ ॥ श्रीरुस्मः ॥

अहं हि चिदिति ॥ चित्स्वरूप एवाहमित्यर्थः ॥ कुतस्तर्हि विवेकिनामपि जीविते स्पृहेत्याशंक्याह ॥ अयमेव हीति
या जीविते स्पृहा अयमेव मे बंधः आसीत् जीवनार्थं पुमान् सुवर्णहरणादिकमपि करोतीति जीवितेच्छा
बंधः ॥ बंधहेतुत्वात् इदानीं तु सच्चिदानंदानुभवशालिनो मम संगस्याप्राणानुषंगबंधनरूपे जीविते
पि स्पृहा नास्तीत्यर्थः ॥ २२ ॥ अथ स्वस्य सर्वाधिष्ठानत्वं पश्यन्नाह ॥ अहो इति ॥ अहो ऽस्माश्चर्ये अनंत महा २५

भोधौ मयि चित्तवाते समुद्यते । समुत्पन्ने सति विचित्रैर्नानाविधैर्भुवनरूपैः कल्लोलैर्द्राक् अत्यर्थं समुदितं उदयो
लब्धः ॥ तथा वारिधेस्तरंगा इव मत्तो भुवनानि वस्तुतो न भिन्नानीत्यर्थः ॥ २३ ॥ प्रारब्धक्षयदशामनुवदति ॥ म
यीति ॥ अनंतमहांतमहांभोधौ । सर्वव्यापकचित्समुद्रे मयि चित्तवाते संकल्पविकल्पकं शालिनि मनोमारु
ते प्रशाम्यति सति संकल्पादिरहिते सति जीववणिजो जीवात्मलक्षणस्य वाणिज्यकर्तुः अभाग्यात् ।

अहो भुवनकल्लोलैर्विचित्रैर्द्राक् समुत्थितं । मय्यनंतमहांभोधौ चित्तवाते समुद्यते ॥ २३ ॥ मय्य
नंतमहांभोधौ चित्तवाते प्रशाम्यति ॥ अभाग्याज्जीववणिजो जगत्पोतो विनश्वरः ॥ २४ ॥ राम ॥

प्रारब्धक्षयात् ॥ जगत्पोतः शरीरादिनौकासमूहं विनाशशीलः विनाशवान् भवतीत्यर्थः ॥ २४ ॥ अ
थ बाधितानुवृत्त्या स्वस्मिन् सर्वजीवव्यवहारं पश्यन्नाह ॥ मयीति ॥ आश्चर्यं निष्क्रिये निर्विकारे मयि
अनंतमहांभोधौ जीवाख्यवीचयस्तरंगा उद्यंति ॥ अभिव्यक्ता भवंती युध्यंति परस्परं घ्नंति ॥
ताडयंती च शत्रुभावाद्यध्यासात् ॥ अन्ये च मिथः खेलंती च मित्रभावाद्यध्यासात् ॥ अविद्याकामक
र्मक्षये सति च मयि विशंती च कस्मात् स्वभावतः ॥ अविद्याकामकर्मस्वभाववशात् उत्पत्त्यादिकं प्राप्नुवंति ॥

अष्टा० स्वभावतः स्वस्य चिद्रूपस्य अंशरूपेण भाव तस्तत्रैव प्रविशंति घटाकाशादय ॥ एवमहाकाश इति विवेकः ॥ २ ॥ स्व
१६ द्वितीयेस्मिन्प्रकरणे शिष्येणानुभवस्थितिः ॥ निवेदिता गुरोस्तुष्ट्यैवकाश्चर्यपुरस्सरा ॥ इति श्रीमद्विश्वेश्वर
विरचितायां मष्टावक्रटीकायां शिष्येणोक्तमात्मानुभवोल्लासपंचविंशतिप्रकरणं समाप्तं ॥ शिष्यानुभवपी
युषे ज्ञाने पि करुणावशात ॥ तद्विज्ञानपरिक्षार्थं शिष्यमाह गुरुः पुनः ॥ १ ॥ विज्ञातात्मानुभवमपि स्वशिष्यं व्यवहा

मय्यनंतमहांभोधौ वाश्चर्यं जीववीचयः ॥ उद्यंति घ्नंति खेलंति प्रविशंति स्वभावतः ॥ २५ ॥ इति श्रीम
दष्टावक्रप्रकरणे ॥ शिष्यप्रोक्तं स्वात्मानुभवोल्लासपंचविंशतिकं समाप्तं ॥ अविनाशिनमात्मान
मेकं विज्ञाते येंवतः ॥ तवात्मज्ञस्य धीरस्य कथमर्थार्ज्जने रतिः ॥ १ ॥ श्री कृष्णायनमः ॥ श्री ॥

रस्थितं दृष्ट्वा तद्विज्ञानपरीक्षार्थं तद्व्यवहारस्थितिमाक्षिप्यात्मानुभवशालिनां स्थितिमुपदिशति । अविनाशि
नमिति ॥ हे शिष्य अविनाशिनं त्रैकालिकसत्ताशालिनं कालतो व्यवच्छेदशून्यं आत्मानं देशतो व्यवच्छेदशू
न्यं एकं वस्तुतो व्यवच्छेदशून्यं चिद्रूपं विज्ञाय निदिध्यस्य तत्त्वतः ॥ आत्मज्ञस्य अतएव धीरस्य तवार्था
र्जने व्यवहारिकार्थसंग्रहे कथं रतिः प्रीतिर्लक्षते इत्याक्षेपः ॥ १ ॥ राम ॥ ॥ श्री ॥ ॥ राम ॥ १६

निर्विकल्पं ३

ननुज्ञाने सति विषयसंग्रहः ॥ कथमनुपपन्न इत्याशंक्य विषयप्रीतेरात्माज्ञानमूलत्वं सदृष्टांतं सोपपत्तिक
माह ॥ आत्माज्ञानादिति ॥ अहो इति संबोधने हे शिष्य विषयभ्रमगोचरे विषये या प्रीतिः । सा आत्माज्ञानादेव भव
ति न तु ज्ञानात् व्यतिरिक्त विषयाणां बाधादिति भावः । अत्र लोकसिद्धं दृष्टांतमाह ॥ शुक्तेरिति । यथा रजतवि
भ्रमं सति शुक्तेरज्ञानतो लोभः । पामराणामप्यनुभवसाक्षिक इत्यर्थः ॥ विषयभ्रमगोचर इत्यत्र विशेषस्यापि

आत्माज्ञानादहो प्रीतिर्विषयभ्रमगोचरे । शुक्तेरज्ञानतो लोभो यथा रजतविभ्रमे ॥ २ ॥ विश्वं स्फुर
ति यत्रेदं तरंगा इव सागरे ॥ सोऽहमस्मीति विज्ञाय किं दीन इव धावसि ॥ ३ ॥ रामचंद्राय नमः ॥ श्री ॥

पूर्वनिपातो विशेषणं विशेष्येण बहुलमित्यत्र बहुलग्रहणादाम्रवृक्षवत् । आत्माज्ञानत इति पदं विषयभ्रम दा
तरं गोचर इत्यनेनापि संबध्यते ॥ २ ॥ अज्ञानमूला विषयप्रीतिरिति प्रागुक्तं । अथ सर्वाध्यासाधिष्ठानतयात्मनि ज्ञा
पु ने सति विषयेषु न प्रीतिसंभव इत्याह । विश्वं स्फुरतीति ॥ सागरे तरंगा इव यथा पृथक्सत्तारहितास्तद्वत् यत्रेदं
विश्वं पृथक्सत्तारहितं स्फुरति स तत्पदार्थोऽहमस्मीति विज्ञाय साक्षात्कृत्य दीन इव ममेदं भवत्विति ॥
तृष्णाकुल इव किं धावसि कथं धावसीत्याक्षेपः ॥ ३ ॥ तदेवं श्लोकत्रयेण ज्ञाननिष्ठे दृश्यमानं विषयभ्र

अष्टा० वहारमाक्षिप्येदानीं सर्वज्ञातानिषु विषयव्यवहारं शिष्यपरिक्षार्थं गुरुराक्षिपति ॥ श्रुत्वापीति ॥ शुद्धं चैतन्यं श्रुत्वा
१७ पि गुरुमुखाद्वेदांतवाक्यतः साक्षात्कृत्यापि तत्पमस्थः समीपस्थ विषये अत्यंतसंसक्तः ॥ सन्नात्मतया एव कथं मालि
न्यं मौढ्यमधिगच्छति प्राप्नोति ॥ अस्य प्रकरणस्य शिष्यजिज्ञासार्थमाक्षेपमुद्रये वप्रवृत्तत्वाद्यत्राक्षेपवाक्ये
के पदे न्यूनरूपते तत्र तदध्याहर्त्तव्यं ॥ ४ ॥ पुनरप्याश्चर्यमुद्रयाक्षिपति ॥ सर्वभूतेष्विति ॥ सर्वभूतेषु ब्रह्मादि

श्रुत्वापि शुद्धचैतन्यमात्मानमतिसुंदरं ॥ उपस्थेत्यंतसंसक्तो मालिन्यमधिगच्छति ॥ ४ ॥ सर्वभूतेषु चा
त्मानं सर्वभूतानि चात्मनि ॥ मुनेर्जानत आश्चर्यं ममत्वमनुवर्त्तते ॥ ५ ॥ आस्थितः परमाद्वैतं मोक्षा
र्थोपि व्यवस्थितः ॥ आश्चर्यं कामवशगो विकलः केलिशिक्षया ॥ ६ ॥ राम ॥ श्री ॥ राम ॥

स्थावरांतेषु आत्मानं अधिष्टानभूतं जानतः सर्वभूतानि चात्मनि रज्जौ भुजंगवदध्यस्तानि जानतो मुनेर्वि
त्व षयेषु ममत्वमनुवर्त्तते इति आश्चर्यं ॥ असंभाव्यं न हि शुक्तिकायामध्यस्तं रजतमिति जानतस्तत्र ममत्वं संभव त्व
तीति भावः ॥ ५ ॥ आस्थित इति ॥ परमं सजातीयविजातीयस्वगतभेदशून्यमद्वैतमास्थितः साक्षादनुभवन त
था मोक्षस्वरूपोर्थः ॥ सच्चिदानंदात्मा तत्र व्यवस्थितस्तदेकप्रवणोपि कामवशः सन् केलिशिक्षया नानाक्रीडाभ्या
सेन विकलो हतप्रतत इत्याश्चर्यं ॥ ६ ॥ राम ॥ १७

उद्भूतमिति । उद्भूतं कामं ज्ञानं दुर्मित्रं ज्ञानस्यात्यंतवैरिणं अवधार्य निश्चित्यापि अतिदुर्बलः अतिशयेन ज्ञानबल
शून्य इव ज्ञानी कामं विषयमाकांक्षेत् ॥ कामं वांछतीदमाश्चर्यं कीदृशः । अंतं कालं अनुसमाश्रितः । नहि समीप
वर्तिन्यंतकाले सति विवेकिना विषयस्मायुक्तो त्यभिप्रायः ॥७॥ इहेति ॥ ऐहिकामुष्मिकाभोगविरक्तस्य नित्यमा
त्मनित्यमनित्यं शरीरादिकं तद्विवेकिनः ॥ मोक्षं सच्चिदानंदस्तत्र कामोंतःकरणं यस्य एवंविधस्य ज्ञानिनोपि मो

उद्भूतं ज्ञानदुर्मित्रमवधार्यातिदुर्बलः ॥ आश्चर्यं काममाकांक्षेत्कालमंतमनुश्रितः ॥७॥ इहामुत्रविर
क्तस्य नित्यानित्यविविकिनः ॥ आश्चर्यं मोक्षकामस्य मोक्षादेव विभीषिका ॥८॥ धीरस्तु भोज्यमा
नोपि पीड्यमानोपि सर्वदा ॥ आत्मानं केवलं पश्य[redacted]न तुष्यति न कुप्यति ॥९॥

इति आश्चर्ये

क्षादेव कोसद्रूपतनुधनवियोगादेव विभीषिका ॥ भयं दृश्यते नहि स्वप्नदृष्टतनुधननाशेपि जाग्रत्तां भयं क्वापि
दृष्टमिति भावः ॥८॥ एवमाक्षेपमुद्रयापूर्वमुक्तं अथ ज्ञानिनस्तोषरोषावनुचित्ताविति कंवतोनि रूपयति ॥ धी
रइति ॥ धीरो ज्ञानी लोकैर्विषयान्भोज्यमानोपि तथाभिंदादिना पीड्यमानोपि सर्वदा आत्मानं केवलं सुखदुःखभोगा
दिरहितं पश्यन् न तुष्यति न च कुप्यति तोषरोषहेतूनां केवलात्मनि असंभावज्ञानादित्यर्थः ॥९॥ रामजी ॥

अष्टा० किंच तोषरोषहेतूनां स्तुतिनिंदादीनां शारीरधर्मत्वाच्छरीरस्य चात्मभिन्नत्वेनानुसंधानात्कथं ज्ञानिनस्तोषरोषा
२९ वित्याह ॥ चेष्टमानमिति ॥ स्वं शरीरं स्वात्मभिन्नं चेष्टाश्रयत्वात् अन्यशरीरवत् इति यः पश्यति सः महाशयः ॥ संस्तवे
स्तुतौ अपि च निंदायां कथं क्षुभ्येत् कथं तोषरोषरूपां विक्रियां व्रजेत् इत्याक्षेपः ॥२०॥ मार्यमारकयोरसत्यत्वानुसं
धानात्संनिहितेपि मृत्यौ ज्ञानिनस्त्रासः कथमित्याह ॥ मायामात्रमिति ॥ इदं दृश्यमानं विश्वं मार्यमारकादि रूपं मम

चेष्टमानं शरीरं स्वं पश्यत्यन्यशरीरवत् ॥ संस्तवे चापि निंदायां कथं क्षुभ्येन्महाशयः ॥२०॥ माया
मात्रमिदं विश्वं पश्यन् विगतकौतुकः ॥ अपि संनिहिते मृत्यौ कथं त्रस्यति धीरधीः ॥२१॥ निस्पृहं मा
नसं यस्य नैराश्येपि महात्मनः ॥ तस्यात्मज्ञानतृप्तस्य तुलना केन जायते ॥२२॥ श्रीकृष्णायनमः ॥

यं मायामात्रमसत्यरूपं पश्यन् अत एव कुत इदं शरीरादिकं । जायते कुत्र च विलयं यात्येवंरूपकौतुकरहितस्त
थाधीरः स्वस्वरूपादचलाधीर्यस्य सः सन्निहिते मृत्यौ सत्स्वपि कथं त्रस्यतीत्याक्षेपः ॥२१॥ सर्वेषामाक्षेपाणां स
मर्थनार्थं ज्ञानिनो निरूपयत्वमाह ॥ निस्पृहमिति ॥ यस्य नैराश्ये मोक्षेपि मानसं निस्पृहं तस्य आत्मज्ञानतृप्तस्य ब्रह्मा
हमस्मीति ज्ञानतः । समस्तसर्वमनोरथस्य केनापि समं तुलना जायते न केनापीत्यर्थः ॥२२॥ हानोपादानादि व्यवहा २९
ज्ञानिनः

BARODA-(INDIA)

माक्षिपति ॥ स्वभावादिति ॥ प्रपंचो मिथ्या दृश्यत्वाच्छुक्तिकारजतवदित्यनुमानादेतत् दृश्यं न किंचन नसन् नाप्य
सदिति जानानो निश्चिन्वन् यो धीरधीः स इदं ग्राह्यमिदं त्याज्यमिति कथं पश्यति स्यादाक्षेपः ॥२३॥ अत्र हेतुमाह ॥ अं
तस्त्यक्तेति ॥ अंतःकरणात् त्यक्ताः कषाया विषयवासना येन तस्य निर्द्वंद्वस्य शीतोष्णादिकं समं चित्तस्य अत एव
निराशिषः विषयकांक्षाविहीनस्य यदृच्छया दैवयोगात् आगतः प्राप्तो भोगः भुंज्यमानो विषयः दुःखाय न भव

स्वभावादेव जानानो दृश्यमेतन्न किंचन ॥ इदं ग्राह्यमिदं त्याज्यं स किं पश्यति धीरधीः ॥२३॥ अंतस्त्यक्त
कषायस्य निर्द्वंद्वस्य निराशिषः ॥ यदृच्छयागतो भोगो न दुःखाय न तुष्टये ॥२४॥ इत्याक्षेपद्वारोपदेश
चतुष्कं ॥ हंतात्मज्ञस्य धीरस्य खेलतो भोगलीलया ॥ न हि संसारवाहीकैर्मूढैः सह समानता ॥१॥

ति तुष्टये च न भवति ॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायामाक्षेपद्वारोपदेशकं नाम तृतीयं प्रक
रणं ॥३॥ गुरुणैव परीक्षितः शिष्यो ज्ञानदृढो भवन् ॥ तानि स्पष्टोक्तचेष्टानां स्पष्टमाचष्ट संभवं ॥१॥ एवं तावद्गुरुणाप
रीक्षार्थमाक्षिप्तः शिष्यः प्रारब्धवशाद्बाधितानुवृत्त्यात्मनिष्ठोऽपि सर्वव्यवहाराणामुपपत्तिमात्मज्ञानोल्लासवशा
देवाहाष्टभिः श्लोकैः ॥ हंतेति ॥ हंत आत्मज्ञानोल्लसिते हर्षे हे गुरो आत्मज्ञस्य सर्वाधिष्ठानतया स्वात्मानं ज्ञा
नतः ॥ अत एव धीरस्य विषयैरविक्षिप्तचित्तस्य भोगलीलया विषयभोगादिरूपया लीलया क्रीडया प्रारब्ध

अ॰टी॰ वशात्स्वच्छंदतया खेलतः क्रीडतः संसारवाह्यैः संसारवृत्तिपशुभिर्मूढैर्देहाद्यात्मवेदिभिः सह न हि समानता
२९ नैव तुल्यत्वं ॥ तदुक्तं भगवता ॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ॥ गुणा गुणेषु वर्त्तंत इति मत्वा न स
ज्जते ॥ ननु संसारव्यवहारस्थो ज्ञानी कथं न संसारितुल्य इत्याशंक्य हर्षादिरहितत्वात्तस्य वैलक्षण्यमा
ह ॥ यत्पदेति ॥ अहो इति ॥ संबोधने हे गुरो यद् अहो आश्चर्यं शक्राद्याः सर्वदेवता अपि यत्पदं प्रेप्स
वः यत्पदप्राप्तिमिच्छंतो दीनास्तदप्राप्तितः शोच्याः वर्त्तंते तत्र सच्चिदानंदाख्ये पदे स्थितास्तत्त्वपदार्थे

यत्पदं प्रेप्सवो दीनाः शक्राद्याः सर्वदेवताः ॥ अहो तत्र स्थितो योगी न हर्षमुपगच्छति ॥ २ ॥ तज्ज
स्य पुण्यपापाभ्यां स्पर्शो ह्यंतर्न जायते ॥ न ह्याकाशस्य धूमेन दृश्यमानापि संगतिः ॥ ३ ॥ रामः ॥
ज्ञानां तत्र

के वर्त्तमानो योगी लब्धसाक्षात्कारो विषयलाभान्न हर्षं प्राप्नोति नापि नष्टपरमादुद्विग्नो भवतीत्य
र्थः ॥ तत्तस्य विध्य किं करत्वं वक्तुं पुण्याद्यसंस्पर्शमाह ॥ तज्ज्ञस्येति ॥ तत्त्वंपदार्थज्ञानिनस्तस्य पुण्यपापाभ्यां
सह अंतःकरणधर्माणां स्पर्शसंबंधो न जायते ॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनेति स्मृतेः ॥
अत्र दृष्टांतमाह ॥ नहीति ॥ यथा हि आकाशस्य धूमेन सह संगतिर्नास्ति तथात्मज्ञस्य न पुण्यादिसंगति
रित्यर्थः ॥ ३ ॥ ननु कर्माणि कृते कथं न पुण्यादिस्पर्श इत्याशंक्य तानि नो विधिनिषेधानि यस्य तमाह ॥ २९

आत्मैवेति येन महात्मना इदं दृश्यमानं सर्वं । जगत् आत्मैवेति ॥ ज्ञातं तं ज्ञानिनं यदृच्छया प्रारब्धवशादेव वर्त्तमानं
को वचनकलापो निषेद्धुं प्रवर्त्तयितुं वा क्षमः समर्थो न कोपीत्यर्थः । तदुक्तं शारीरकभाष्ये । अविद्यावद्विषयो
वेद इति । प्रबोधनीय एवासौ सुप्तो राजेव बंदिभिरिति स्मृतिर् ॥ ४ ॥ ननु ज्ञानिनोपि न यदृच्छया प्रवर्त्तंते किं
चिदिच्छयैव । इच्छानिच्छयोर्निवर्त्तयितुमज्ञाश्चत्वारि॰ त्याशंक्याह । आब्रह्मेति ॥ यद्यपि ब्रह्माणमारभ्य स्तं

आत्मैवेदं जगत्सर्वं ज्ञातं येन महात्मना ॥ यदृच्छया वर्त्तमानं तं निषेद्धुं क्षमेत कः ॥ ४ ॥ आब्रह्मस्तंबप
र्यंते भूतग्रामे चतुर्विधे ॥ विज्ञस्यैव हि सामर्थ्यमिच्छानिच्छाविवर्ज्जने ॥ ५ ॥ आत्मानमद्वयं कश्चि
ज्जानाति जगदीश्वरं ॥ यद्वेत्ति तत्स कुरुते न भयं तस्य कुत्रचित् ॥ ६ ॥ इसुखासषट्कं ॥ ४ ॥ राम ॥

बपर्यंते रिच्छानिच्छे विवर्ज्जयितुमज्ञाको तथापि विज्ञस्यैव इच्छाद्वेष निवर्त्तने सामर्थ्यमतो यदृच्छया प्रवर्त्तमानो ज्ञा
नीन विधिनियम्य इत्यर्थः ॥ ५ ॥ अद्वैतज्ञानेन द्वितीयस्य बाधितत्वात् ज्ञानिनां भयहेतुः कोपि नास्तीत्युपसंहरति ॥ ६ ॥
आत्मानमद्वयं कश्चिज्जानाति जगदीश्वरमिति ॥ कश्चित्सहस्रेषु एक एव जगदीश्वरं तत्पदार्थं आत्मानं त्वं
पदार्थं अद्वयं अभिन्नं जानाति स यद्वेत्ति प्रारब्धवशाद्बाधितानुवृत्त्या इदं कर्त्तव्यमिति मन्यते तत्करोति ॥ एवं

अष्टा० कुर्वतस्तस्य कुत्रचित् इहंवाऽमुत्रवा भयं नास्ति भयहेतोरद्वैतज्ञानबाधितत्वादिति भावः ॥ ६ ॥ इत्यष्टावक्र
२० मुनिविरचितेऽध्यात्मशास्त्रे शिष्यप्रोक्तानुभवोल्लासषट्कविवरणं ॥ एवमुक्त्वा सषट्केन स्वशिष्ये विप
ह्निते ॥ गुरुर्देहोपदेशार्थं लययोगमथाब्रवीत् ॥ एवमुक्त्वा सषट्केन शिष्ये परिह्निते सति पुनर्देहोपदेशा स्व
र्थमाचार्यो लयमुपदिशति ॥ श्लोकचतुष्टयेन ॥ न त इति ॥ हे शिष्य शुद्धबुद्धस्वभावस्य तव केनापि देह

न ते संगोऽस्ति केनापि किं शुद्धस्त्यक्तुमिच्छसि ॥ संघातविलयं कुर्वन्नेवमेव लयं व्रज ॥ १ ॥ उदेति भव
तो विश्वं वारिधेरिव बुद्बुदः ॥ इति ज्ञात्वैकमात्मानमेवमेव लयं व्रज ॥ २ ॥ राम ॥ ॥ श्री ॥ राम ॥

म गेहादिनाहंकारममकारास्पदेन संगो नास्ति अतः शुद्धः असंगस्त्वं किं त्यक्तुं किमुपादातुं चेच्छसि ॥ तस्मा
त्संघातस्य देहस्य विलयं कुर्वन्नाहं देह इति निरसनं कुर्वन्नेवमेव देहादिनिरसनरूपमेव लयं व्रज
॥ १ ॥ उदेतीति ॥ हे शिष्य भवतः सकाशाद्विश्वमुदेति भवदभिन्नमेव ॥ यथा वारिधेः सकाशाद्बुद्बुदो वा
ए रिधेरभिन्न एवोदेति इत्येवं प्रकारेणैकं सजातीयविजातीयभेदरहितमात्मानं ज्ञात्वा एवमेकात्मज्ञा
नमेव लयं व्रज ॥ २ ॥ ननु प्रत्यक्षतो भिन्नतया हारसर्पादिभेदे प्रतीयमाने कथं देहादिविलय इत्यत आह ॥ २०

प्रत्यक्षमिति ॥ प्रत्यक्षमपीदं व्यक्तं दृश्यं विश्वं मम त्वयि नास्त्येव । अवस्तुत्वाद्रज्जुभुजंगवत् । तस्मादेवमेव
लयं व्रज द्वितीयस्य हेयोपादेयस्यैवाऽभावादित्यर्थः ॥ ३ ॥ समेति ॥ पूर्णः आत्मा नेदं पूर्णस्त्वमत एव देवव
त्वाद्भूतयोः सुखदुःखयोः समः ॥ इच्छानिच्छयोश्च सममत्त्याजीविते मृत्यौ वा समो निर्विकारः सुखदुःखादीना
मनात्मधर्माणां तुच्छत्वानुसंधानात् ॥ त्वं सुखदुःखादिषु समब्रह्मदृष्टिरूपं लयं व्रजेत्यर्थः ॥ ४ ॥ इति श्री

प्रत्यक्षमप्यवस्तुत्वाद्विश्वं नास्त्यमले त्वयि ॥ रज्जुसर्प इव व्यक्तमेवमेव लयं व्रज ॥ ३ ॥ समदुःख
सुखः पूर्ण आशानैराश्ययोः समः ॥ समजीवितमृत्युः सन्नेवमेव लयं व्रजः ॥ ४ ॥ इति लयचतुष्कं ॥ ५ ॥
आकाशवदनंतोऽहं घटवत्प्राकृतं जगत् ॥ इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ॥ १ ॥ राम ॥

मद्विश्वेश्वरविरचितायामष्टावक्रटीकायामाचार्येणोक्तं लयचतुष्टकं प्रकरणं समाप्तं ५ । गुरुणैवं परीक्षार्थमुप
दिष्टे लये सति ॥ पूर्णात्मनो लयादीनां शिष्योऽसंभवमब्रवीत् । तदेव गुरुणाप्येतत्परीक्षार्थं लययोगे समुपदि
ष्टे सति लयाद्यभावोपपादकमात्मात्मज्ञानमनुवदन्नेव शिष्यः पूर्णात्मनो लयाद्यसंभवमाह ॥ चतुर्भिःश्लो
कैः ॥ आकाशवदिति ॥ अहमात्माकाशवदनंतः नन्वनंतस्यात्मनो देहादिनिवासः कथमित्यत आह । घट

१ यथा घटाकाशस्याव भेदे को निवासस्थानं च। नुभवरूपमत्र प्रमाणमतो २

अष्टा० ६ वदिति प्रकृतं प्रकृतिकार्यं जगद्देहादिकं घटवत्। तथा चात्मनो देहादिकदेशावच्छेदक एव व्योमेव घ
२१ टादिरित्यर्थः। अत्र प्रमाणमाह॥ इतीति। इत्येवं वेदांतसिद्धं ज्ञानम[illegible]ना न्यथा भावशंकेत्यर्थः। तथेति
तथा सत्यात्मनो नंतत्वे सत्येतस्यात्मनस्त्यागो ग्रहणं लयश्च न संभवति। परिच्छिन्नस्यैव घटादेस्त्यागादिद
र्शनादित्यर्थः॥ १ घटाकाशदृष्टांते देहात्मनोर्भेदं शंकास्यादित्यपरितोषादाह। महोदधिरिति॥ स्पष्टं॥ २

महोदधिरिवाहं स प्रपंचो वीचिसंन्निभः॥ इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः॥ २ अहं स
शुक्तिसंकाशो रूप्यवद्विश्वकल्पना॥ इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः॥ ३ अहं वा सर्वभू
तेषु सर्वभूतान्यथो मयि। इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः॥ ४॥ इत्युत्तरोपदेशचतुष्कं ६

समुद्रवीचिदृष्टांते देहात्मनोर्विकारविकारित्वं शंकास्यादित्यपरितोषादाह॥ अहं स इति॥ स्पष्टं॥ ३॥ शुक्ति
दृष्टांतेप्यात्मनि परिछिन्नत्वशंका स्यात्तद्व्यावृत्त्यर्थमाह॥ अहमिति॥ अहं वा अहमेव सर्वभूतेषु प्रकृ
तिप्राकृतिकेषु सत्तास्फूर्त्यादिपदत्वेनास्मि अथातो हेतोः। सर्वभूतान्यधिष्ठानभूते मयि विवर्तंत इति ज्ञा
नं वेदांतसिद्धं तथा सत्येतस्यात्मनस्त्यागादिकं न संभवतीत्यर्थः॥ ४॥ इत्युत्तरोपदेशचतुष्कं षष्ठम्॥ ६

ननुलययोगाभावे संसारविक्षेपो निरंकुशः प्रसरः स्यादित्याशंकातस्यानिष्टत्वाभावमनुभवं प्रपंचकेनोत्तर
माह ॥ शिष्यः लययोगाननुष्ठाने व्यवहारं निरंकुशं ॥ आशंक्य शिष्यः सोत्प्रासादब्रवीत् गुरुमुत्तरं ॥ मयीति ॥ मय्या
त्मनि अनंते महासमुद्रे विश्वाख्यः पोतः नौकास्वांतवातेन मनुपवनेन इतस्ततो भ्रमति ॥ अत्र मम न असहि नृ
श्रा८त ष्णुता अ सहनं तु ता नास्ति समुद्रस्येव नौकापरिभ्रमणे इत्यर्थः ॥ १ ॥ जगव्द्यवहारस्यानिष्टत्वाभावः पूर्व

मय्यनंतमहांभोधौ विश्वपोत इतस्ततः ॥ भ्रमति स्वांतवातेन न ममास्त्यसहिष्णुता ॥ १ ॥ मय्यनंत
महांभोधौ जगद्वीचिः स्वभावतः ॥ उदेतु वास्तमायातु न मे वृद्धिर्न च क्षतिः ॥ २ ॥ राम ॥ श्री ॥ राम ॥

मुक्तः ॥ अथ जगदुदयापगमयोरपि नातिष्टत्वमाह ॥ मयीति ॥ मयि आत्मनि अनंते विनाशरहिते महति व्या
पके भोधौ समुद्रे जगदाख्या वीचीः स्वभावतः स्वरूपत्वाद्धि स्वभावादुदेतु च अपरमस्तमायातु मम तदुद
ये वृद्धिर्नास्ति ॥ व्यापकत्वात् तदपगमे च क्षतिर्नास्ति अनंतत्वादित्यर्थः ॥ २ ॥ पूर्वदृष्टांते स्वात्मनो जगद्वि
कार इति ॥ रामचंद्राय नमः ॥

भ्रमः स्यात्तन्निवारणार्थमाह ॥ मयीति ॥ मयि अनंतमहांभोधौ नामप्रसिद्धं विश्वं कल्पनामात्रमेव न तु तात्विकं अ
त एव कारणादहमिति शांतः प्रपंचोपप्लवरहितः ॥ अत्र हेतुमाह ॥ निराकार इति ॥ एतदात्मज्ञानमेव अहमास्थितः आ
श्रितो न तु नययोगं तस्य पूर्वमेव दूषितत्वात् ॥ ३ ॥ अतिशांतत्वं स्पष्टयति ॥ नात्मेति ॥ आत्मा भावेषु देहादिषु आधेयं धं त
नो तया नास्ति व्यापकत्वात् भावो देहादिस्तत्रात्मनि नास्ति निरंजनत्वात् इति कारणादहमसक्तः संसर्गरहितो

मय्यनंतमहांभोधौ विश्वं नाम विकल्पना ॥ अतिशांतो निराकार एतदेवाहमास्थितः ॥ ३ ॥ नात्मा भावे त्मा
षु नो भावस्तत्रानंते निरंजने ॥ इत्यासक्तो स्पृहः शांतो एतदेवाहमास्थितः ॥ ४ ॥ अहो चिन्मात्रमेवाह
मिंद्रजालोपमं जगत् ॥ अतो मम कथं कुत्र हेयोपादेयकल्पना ॥ ५ ॥ इत्यनुभवपंचकं ॥ राम ॥ ७

तो एवास्पृहः ॥ ईर्ष्यादिधर्मासंश्लिष्टोंतः शांत इत्यर्थः ॥ ४ ॥ इच्छादिरहितत्वहेत्वंतरमप्याह ॥ अहो इति ॥ अहो इत्याश्च
र्यरूपमलौकिकं चिन्मात्रं चैतन्यमात्रमेवाहं जगत्सर्वं प्रपंचजातं इंद्रजालोपमं ॥ दर्शकालेपि पृथक्सत्तार
हितं ॥ अतो विश्वस्य पृथक्सत्तारहितत्वात् मम कुत्र वस्तुनि कथं केन कारणेन न हेयोपादेयबुद्धिः स्यान्न कुत्रापी
॥ त्यर्थः ॥ ५ ॥ राम ॥

ORIENTAL INSTITUTE
M. S. UNIVERSITY
BARODA-(INDIA)

इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायामनुभवपंचकविवरणं समाप्तं ॥ इत्थं पुरिदिन्नज्ञानं शिष्यमेवाभि
नंदितु ॥ गुरुर्बंधस्य मोक्षस्य च व्यवस्थां समग्रामब्रवीत् ॥ तदेव षड्भिः प्रकरणैः [illegible]ं स शिष्यं सम्यक् परिक्षिप्य बंधमो
क्षव्यवस्थानिरूपणव्याजेन गुरुस्तच्छिष्यानुभवमभिनंदति चतुर्भिः श्लोकैः ॥ तदेति ॥ हे शिष्य अतो मम कथं कुत्र
हेयोपादेयकल्पनेत्यं ते यत्त्वयोक्तं तत्तथैव यतश्चित्तं यदा वां[illegible]द्विविकारवद्भवति तदैव जीवस्य बंधः इत्यर्थः ॥

तदा बंधो यदा चित्तं किंचिद्वांछति शोचति ॥ किंचिन्मुंचति गृह्णाति किंचिद्धृष्यति कुप्यति ॥ १ ॥ तदा मु
क्तिर्यदा चित्तं न वांछति न शोचति ॥ न मुंचति न गृह्णाति न हृष्यति न कुप्यति ॥ २ ॥ तदा बंधो यदा चित्तं स
क्तं कास्वपि दृष्टिषु ॥ तदा मोक्षो यदा चित्तं असक्तं सर्वदृष्टिषु ॥ ३ ॥ राम ॥ ॥ श्री ॥ ॥ राम ॥

तदा मुक्तिरिति ॥ यदा चित्तं वांछादिविक्रियातीतं तदा मुक्तिरित्यर्थः ॥ १ ॥ तदेवं पृथक् बंधमोक्षावुक्तौ ॥ अथ
समुच्चयेन बंधमोक्षावाह ॥ तदा बंध इति ॥ यदा चित्तं कास्वप्यनात्मदृष्टिषु संसक्तं तदा बंधः ॥ यदा चित्तं
सर्वास्वप्यनात्मदृष्टिषु असक्तं तदा मोक्ष इत्यर्थः ॥ ३ ॥ असक्तं वा बाधितानुवृत्त्या दग्धपटायमानाः सर्वा अपि
विषयदृष्टिस्तयाप्यहंकारनिवृत्तो मोक्षस्तदनुवृत्तौ बंध इति वदन्नेव शिष्योक्तमर्थमभिनंदितु वदति ॥

बंधहेतुस्तन्निवृत्तौ मोक्ष इति पु[illegible]र्वमुक्तं १

अष्टा॰ यदा नाहमिति ॥ यदाहमित्येवंरूपः अध्यासोऽनर्थमूलभूतो निवर्तते ॥ तदा मोक्षः यदा च सोऽनुवर्तते तदा
२३ बंधनमिति ज्ञात्वा ॥ हेलया अनायासेनैव हानोपादानादिक्रियाणामकर्त्ता त्वमसि ॥ अकर्तृत्वज्ञानेन कर्तृ
त्वाभिमानोच्छेदादिति भावः ॥४॥ इति श्रीमहेश्वरविरचितायामष्टावक्रटीकायां गुरुप्रोक्तं बंधमो
क्षव्यवस्थाप्रकरणं अष्टमं समाप्तं ॥८॥ शिष्योक्तानुभवस्यैकदा दार्ढ्यार्थं गुरुणोच्यते ॥ निर्वेदस्याष्टमष्टा

यदा नाहं तदा मोक्षो यदाहं बंधनं तदा ॥ मत्वेति हेलया किंचिन्मा गृहाण विमुंच मा ॥४॥ इत्यष्टाव
क्रे बंधमोक्षचतुष्कमष्टमं ॥ कृताकृते च द्वंद्वानि कदा शांतानि कस्य च ॥ एवं ज्ञात्वेह निर्वेदाद्भव त्या
गपरो व्रती ॥१॥ रामः ॥

॥ निरिच्छादिस्वजनात्मकः ॥ मत्वेति हेलया किंचिन्मा गृहाणेति ॥ यदुक्तं तत्र किं
द्वारमित्यपेक्षायां गुरुरनुमोदनमुद्रया वैराग्याष्टकमाह ॥ कृतेति ॥ कृताकृते इदं कर्तव्यमिदमकर्तव्य
मित्यभिनिवेशो द्वंद्वानि सुखदुःखादीनि कस्य कदा वा शांतानि अपि तु न कस्यापि न कदापि शांतानि ए
वं ज्ञात्वा ॥ इह कृताकृतादिषु निर्वेदादभिनिवेशादिपरित्यागादेवं [illegible] सांगं रो भव ॥ कीदृशो [illegible] अव्रती प
नास्ति व्रतं कुत्राप्याग्रहो यस्य सः ॥१॥ चित्तस्य धर्मस्त्यागरूपो निर्वेदस्तु कस्यचिदेव स्यान्न तु सर्वस्य २३

स्वं २

त्याह ॥ कस्यापीति ॥ हे तात त्रिष्वपि सहस्रेषु मध्ये कस्यचिदेव धन्यस्योत्पत्तिविनाशरूपलोकचेष्टावलोकनात् ॥ जी
वितेच्छा भोगेच्छा तानेच्छादय उपशमं गता ॥ इदं तु तादृक् निर्वेदसंपन्नं त्रिष्वपि मन्निनंदितुमेवोच्यते ॥ [illegible] पदिश्य न त
न इति प्रागुक्तमेव ॥ २ ॥ ननु तानि नो सर्वत्रेच्छोपशमः किंहेतुक इत्यत आह ॥ अनित्यमिति ॥ इदं दृश्यमानं सर्व
प्रपंचजातं अनित्यं चेतन्नेयमस्तं तथा पृथक्सत्वेन गृह्यमाणं सत् ॥ आध्यात्मिकाधिदैविकाधिभौतिक

कस्यापि तात धन्यस्य लोकचेष्टावलोकनात् ॥ जीवितेच्छा बुभुक्षा च बुभुक्षोपशमं गताः ॥ २ ॥ अनित्यं
सर्वमेवेदं तापत्रितयदूषितं ॥ असारं निंदितं हेयमिति निश्चित्य शाम्यति ॥ ३ ॥ कोसौ कालो वयः किं
वा यत्र द्वंद्वानि नो नृणां ॥ तान्युपेक्ष्य यथाप्राप्तवर्ती सिद्धिमवाप्नुयात् ॥ ४ ॥ श्रीपरमात्मने नमः ॥ बू ॥

तापत्रितयदूषितं ॥ अत एव असारं तुच्छं अत एव हेयं पृथक्सत्तया ॥ नैवादरणीयमिति निश्चित्य ज्ञानी शाम्य
ति ॥ कृत्वापि इच्छां न करोति ॥ ३ ॥ द्वंद्वानामारब्धकर्मवशादवश्यंभावित्वात् तत्रेच्छानिच्छे विहाय ॥ यथाप्राप्तभो
गी मुक्तिमाप्नुयादित्याह ॥ कोसौ विति ॥ यत्र नृणां द्वंद्वानि सुखदुःखादीनि न संति असौ कः कालः को वाल्यादि बा
वयो लक्षणा शरीरावस्था अपि तु न कापीति विचार्य तानि द्वंद्वान्युपेक्ष्य तत्रेच्छामनिच्छां कृत्वा यथाप्राप्ते
षु अनासक्ततया वर्ती सिद्धिं मुक्तिं अवाप्नुयादित्यर्थः ॥ ४ ॥ राम ॥ ॥ श्री ॥ ॥ रामः ॥

तर्कशास्त्रादिज्ञानेषु निष्ठा न कर्तव्या नानाविप्रतिपत्तिग्रस्तत्वान्नापि कर्मसु नापि अष्टांगयोगादिष्वित्याह॥
नानामतमिति॥ महर्षीणां गोतमजैमुनिप्रभृतीनां मतं नानाविधं अपरिच्छिन्नं दृष्ट्वा तर्कशास्त्रादिभ्यो नि
र्वेदं आपन्नस्तथा साधूनां कर्मनिष्ठानां मतं नानाविधं केचिद्धोमपराः केचिज्जपपराः केचित्कृच्छ्रचांद्राय
णादिपरा इति नानाविधं दृष्ट्वा कर्मभ्योपि निर्वेदं आपन्नस्तथा योगिनां मतं नानाविधं केचिदष्टांगयोग
पराः केचिन्महदादिप्रसंख्यानपरा इति नानाविधं दृष्ट्वाष्टांगयोगादिभ्योपि निर्वेदमापन्नः केवलमात्मानु

नानामतं महर्षीणां साधूनां योगिनां तथा॥ दृष्ट्वा निर्वेदमापन्नः को न शाम्यति मानवः॥५॥ कृत्वा
मूर्त्तिपरिज्ञानं चैतन्यस्य न किं गुरुः॥ निर्वेदसमतायुक्त्या यस्तारयति संसृतेः॥६॥ श्रीराम॥

संधाननिष्ठः को न शाम्यति॥ कः सुखं न प्राप्नोतीत्यर्थः॥५॥ केवलज्ञाननिष्ठामेवाश्रितस्य कमीदिकं मा कुर्वि
त्याह॥ कृत्वेति॥ निर्वेदसमतायुक्त्या निर्वेदो नाम विषयानासक्तिस्तथा शत्रुमित्रेषु समता सर्वत्रात्मबु
द्धियुक्तिर्नाम शास्त्रानुग्रहकस्तर्क एतैः चैतन्यस्य सच्चिदानंदस्य मूर्त्तिपरिज्ञानं स्वरूपसाक्षात्कारं कृत्वा
तदनंतरं नास्ति कश्चित् गुरुर्यस्य स न किं गुरुः एवंविधो यः स संसृतेः सकाशादात्मानं तारयति॥६॥
विनिर्मुक्त इत्युच्य

स्य चेतनं स्वरूपज्ञानोपायमाह । पश्येति । हे शिष्य भूत... नू यथार्थतस्तत्त्वतः भूतमात्रान् ।।
पश्य न तु आत्मस्वरूपात् एवं सति त्वं तत्क्षणाद्बंधनिर्मुक्तः । शराराहं ... वत्ति मैं मुक्तः सन् शरीरादिद्वि
कात्मस्वरूपस्थो भविष्यसि । शरीरादावनात्मतया ज्ञाते सति तत्साक्षिभूत आत्मा झटित्ति सुज्ञेय इति ।।
भावः ।। ७ ।। नन्वेवमात्मनि ज्ञातेपि तत्र निष्ठा कथं स्यादित्याशंक्य वासनात्यागादित्याह । वासना इति ।। वा

पश्य भूतविकारांस्त्वं भूतमात्रान् यथार्थतः ।। तत्क्षणाद्बंधनिर्मुक्तः स्वरूपस्थो भविष्यसि ।। ७ ।।
वासना एव संसार इति सर्वा विमुंच ताः ।। तत्त्यागो वासनात्यागात्स्थितिरद्य यथा तथा ।। ८ ।। राम ।।

सना विषयवासना एवं संसार इति कारणात् ता वासनास्त्वं मुंच ।। वासनात्यागाच्चात्मनिष्ठायां सत्यां
तस्य संसारस्य त्याग इत्यर्थः ।। अद्य अधुना ।। वासनत्यागे सति स्थितिर्यथा तथा यथा प्रारब्धं तथा
रित्यर्थः ।। ८ ।। इति निर्वेदाष्टकविवरणं ।। विषयाणामभावेपि नु ।। राम ।। ।। श्री ।। ।। राम ।।

अष्टा० षि निर्वेद इरितः॥ तस्मिन्नर्थे च विषये वैरस्यं त्वां॥ तिरीर्यते॥ विषयैर्नापि संतोषरूपो निर्वेदः प्रागुक्तं अत्र वि
२५ षेदानीं विषयस्त्सोपक्रम मद्दिनंदन मुद्ध्या गुरुरुदाहरत्ति॥ विहायेति॥ कामं वैरिणं ज्ञानशत्रुं विहाय
तथा अनर्थसंकुलं अर्जने रक्षणे क्रुरु॥ ननु मित्रक्षेत्रादि फलकेषु कर्मसु येवानेकशोक दुःखसंकु व्य 3
लं अर्थं विहाय तथा एतयोः कामार्थयोर् अनर्थयोर्हेतुं धर्ममपि विहाय सर्वत्र त्रिवर्गहेतुकर्मसु अ

इति निर्वेदाष्टकं॥ ८ विहाय वैरिणं काममर्थं चानर्थसंकुलं॥ धर्ममप्येतयोर्हेतुं सर्वत्रानादरं कुरु॥
वा ॥१॥ स्वप्नेंद्रजालवत्पश्य दिनानि त्रीणि पंच वा॥ मित्रक्षेत्रधनागारदारादायादिसंपदः॥२॥ रामः॥

नादरमुपेक्षां कुरु॥१॥ ननु मित्रक्षेत्रादिफलकेषु कर्मसु कथमनादर इत्याशंक्य मित्रादीनामनि
द्रे त्यत्वमाह॥ स्वप्नेति॥ हे शिष्य मित्रादिसंपदः स्वप्नेंद्रजालवत्पश्य यतो दिनानि त्रीणि पंच वा स्थायि ष्य
न्य इत्यर्थः॥२॥ राम॥ श्री॥ राम॥ श्री॥ कृष्णः॥ श्री॥ कृष्णः

सर्वत्रानादरं कुर्वित्यनेनोक्तं वैतृष्ण्यं पुरुषार्थहेतुरित्याह ॥ यत्र यत्रेति ॥ यत्र यत्र येषु येषु प्रसिद्धेषु विष
येषु तृष्णा भवेत्तमेव संसारं विद्धि ॥ विषयतृष्णाया एव कर्मद्वारा संसारहेतुत्वात् । अतः प्रौढवैराग्यं प्रा
प्तेर्थे प्रीत्यभावमास्थाय वीततृष्णः अप्राप्तार्थेच्छारहितः सन्नात्मनिष्ठः सुखी भवेत्यर्थः ॥ ३ ॥ अमुमेवा यो३
र्थं भङ्ग्यन्तरेणाह । तृष्णामात्रेति । तृष्णामात्रस्वरूप एव बंधः कर्मद्वारा बंधहेतुत्वात् । तन्नाशस्तृष्णा

यत्र यत्र भवेत्तृष्णा संसारं विद्धि तत्र वै ॥ प्रौढवैराग्यमास्थाय वीततृष्णः सुखी भव ॥ ३ ॥ राम ॥

नाश एव मोक्षो निवृत्तिहेतुत्वात् । तन्नाशो मोक्ष इत्यत्र हेतुमाह ॥ भवेति ॥ भवतीति भावो देहादिर्वि
षयस्तत्र संगाभावमात्रेण मुहुर्मुहुः कुर्वाणं प्राप्तितुष्टिः आत्मप्राप्तिजः संतोषः स्यादतस्तृष्णानाश
एव मोक्ष इत्यर्थः ॥ प्राप्तिस्तुष्टिरिति पा ॥ राम ॥ ॥ राम ॥ ॥ श्री ॥ ॥ राम ॥ ॥ रामः ॥

अष्टा॰ २ वप्राप्तिस्यात् ॥ तुष्टिश्चस्यादित्यर्थः ॥ ४ ॥ ननु बुभुक्षारूपा इच्छा कथं त्याज्येत्याशंक्याह ॥ त्वमेक इति ॥ इह जग
२६ त्त्रितय एव पदार्था आत्मा जगत् अविद्या च ॥ तत्र आत्मा तावत् त्वमेवैकश्चेतनः शुद्धो न तु चिद्भिन्न इति
स्वात्मनमेवैकं पूर्णं ज्ञात्वा नान्या पुनरात्म बुभुक्षायुक्ता नापि जगत् बुभुक्षायुक्तं जगतः ॥ असत्त्वात् जड

इच्छामात्रात्मको बंधस्तन्नाशो मोक्ष उच्यते ॥ भवासंसक्तिमात्रेण प्राप्तितुष्टिर्मुहुर्मुहुः ॥ ४ ॥ त्वमे
कश्चेतनं शुद्धो जडं विश्वं असत्तथा ॥ अविद्यापि न किंचित्सा का बुभुक्षा तथापि ते ॥ ५ ॥ राम ॥

उत्वाच्च नापि अविद्या बुभुक्षायुक्ता तस्या अपि सदसद्विलक्षणरूपा निर्वचनीयत्वात् ॥ तथा च तव
बुभुक्षापि कायुक्ता न काचिदपीत्यर्थः ॥ ५ ॥ जडे विश्वमसदुत्युक्तं तद्विशदयति ॥ राज्यादीनि सर्वाणि सं
सक्तस्यापि आसक्तिं कुर्वाणस्यापि तव जन्मनि जन्मनि नाना जन्मसु नष्टानासतो ॥ रामजीसे

ORIENTAL INSTITUTE,
M. S. UNIVERSITY,
BARODA-(INDIA)

विश्वमसदित्यर्थः ॥ ६ ॥ बुभुक्षयापि न कर्त्तव्येति प्रागुक्तं । अथ धर्मार्थकामयोध्यानकार्यत्वमाह । अलमिति
अर्थादिना अलं अर्थकामधर्मेषुइध्यानकार्यत्वमित्यर्थः ॥ अत्र हेतुमाह ॥ एभ्य इति । यतः कारणात् संसारकांता
रे संसारलक्षणे दुर्गमे वर्त्मनि श्रान्तस्तव एभ्यः अर्थादिभ्यः विश्रांतिर्भ्रमणविच्छेदो नाभूत् तेनार्था
दिर्ध्यान कर्त्तव्येत्यर्थः ॥ ७ ॥ इच्छाया उपशमः प्रागुक्तः । अथ क्रियामात्रोपशममाह । कृतमिति । हे शिष्य

राज्यं सुताः कलत्राणि शरीराणि सुखानि च ॥ संसक्तस्यापि नष्टानि तव जन्मनि जन्मनि ॥ ६ ॥ अल
मर्थेन कामेन सुकृतेनापि कर्मणा । एभ्यः संसारकांतारे न विश्रांतमभून्मनः ॥ ७ ॥ कृतं न कति
जन्मानि कायेन मनसा गिरा ॥ दुःखमायासदं कर्म तदद्याप्युपरम्यतां ॥ ८ ॥ इत्युपशमाष्टकं ॥ १ ॥

आयासदं प्रयासदं अत एव दुःखं कर्म कायादिना कति जन्मानि न कृतं अपि तु यावदद्यप्राचीनसर्वजन्म
स्वपि कृतं कर्मणानुत्वयानर्थ एव लब्धस्तस्मादद्यापि अधुनाऽकर्मभ्य उपरम्यतां ॥ ८ ॥ इति श्रीमद्धिवे
श्वरविरचितायामष्टावक्रटीकायां गुरुक्रमोपशमप्रकरणं ॥ राम ॥ १० ॥ श्री ॥ ॥ राम ॥

अष्टा० उक्ताशांतिर्न विज्ञानं विना कस्यापि जायते ॥ इति निश्चेतुमेवाह गुरुः शांतीनामष्टकं ॥ १ ॥ उक्ताशांतिर्विज्ञाना
२७ देवस्यान्नत्वन्यथेति बोधयितुं ज्ञानाष्टकमाह ॥ तत्रादौ ज्ञानसाधनान्याह ॥ भावाभावेति ॥ भावाभाव
या रूपो विकारः स्वभावात् मायातः संस्कारादेव जायते न तु निर्विकारादात्मन इति निश्चयवान् ॥ पुरुषो नि

भावाभावविकारश्च स्वभावादिति निश्चयी ॥ निर्विकारो गतक्लेशः सुखेनैवोपशाम्यति ॥ १ ॥ ईश्व
रः सर्वनिर्माता नेहान्य इति निश्चयी ॥ अन्तर्गलितसर्वाशः शांतः क्वापि न सज्जते ॥ २ ॥ ग मजीससमेठ ॥

श्चयवत्त्वात् एवं सुखेनैव अनायासेनैव तु उपशाम्यति ॥ १ ॥ ननु मायाया जडत्वात्तत एव कथं भावाभाववि
कार इत्याशंक्याह ॥ ईश्वर इति ॥ ईश्वर एव सर्वनिर्माता न त्वन्यो जीवः ईश्वरपरवशत्वात् इति निश्चयी
पुरुषो निश्चयवशादेवान्तर्गलितसर्वाशः ॥ अत एव शांतो निश्चलचित्तः सन् क्वापि न सज्जते ॥ २ ॥

नन्वीश्वर एव चेत्सर्वं निर्माता तर्हि कांश्चिद्दरिद्रान् कांश्चित्तु धनिनस्तथा कांश्चित्सुखिनः कांश्चित्तु दुःखिनोँश्चय २
तस्तस्य वैषम्यनैर्घृण्ये स्यातामित्याशंक्याह ॥ आपद इति ॥ कालेसमयविशेषे आपदः । संपदश्च देवात्मा देवा]
कर्मादृष्टा देवेश्वर परियान्विता देवेति निश्चयी अत एव न हृष्टो वा न रुष्टः ॥ अत एव नित्यं स्वच्छेंद्रियो वि

आपदः संपदः काले देवादेवेति निश्चयी ॥ हृष्टः स्वच्छेंद्रियो नित्यं न वांछति न शोचति ॥ ३ ॥ सु
खदुःखे जन्ममृत्यू देवादेवेति निश्चयी ॥ साध्यादर्शी निरायासः कुर्वन्नपि न लिप्यते ॥ ४ ॥ राम ॥

दे षयानां कुर्वेँद्रियः अप्राप्तं न वांछति नष्टं च न शोचतीत्यर्थः ॥ ३ ॥ ननु ऊँ निश्चयवानपि कर्माणि कुर्वन्नेव तत्व १
दृश्यत इत्याशंक्याह ॥ सुखेति ॥ कर्मफलभूतेषु सुखादिके देवाददृष्टादेव इति निश्चयी ॥ अत एव मया इ
दं फलं साध्यमित्यदर्शी अत एव निरायासः श्रमरहितः प्रारब्धवशात् कुर्वन्नपि न लिप्यते ॥ कर्मजानर्थभा
गो न भवति ॥ कर्तृत्वाध्यासऽरहितत्वादित्यर्थः ॥ ४ ॥ रामः ॥ ॥ श्री ॥ ॥ रामः ॥

ननु ऊर्ध्व [illegible] त्कथं निरायासः स्यादित्याशंक्याह ॥ चिंतयेति । इह दुःखं चिंतया जायते नान्यथेति निश्चयी अत एव
च तया चिंतया हीनः अत एव शांतः स्थिरांतःकरण अत एव सर्वत्र सुखतत्साधनयोर्गलितस्पृहः पुरुषः सु
खी भवतीत्यर्थः ॥ ५ ॥ उक्तसाधनैः सिद्धज्ञानिनो दशां निरूपयति ॥ नाहमिति । अहं देहो न तथा मे दे

चिंतया जायते दुःखं नान्यथेहेति निश्चयी ॥ तया हीनः सुखी शांतः सर्वत्र गलितस्पृहः ॥ ५ ॥ नाहं
देहो न मे देहो बोधोऽहमिति निश्चयी ॥ कैवल्यमिव संप्राप्तो न स्मरत्यकृतं कृतं ॥ ६ ॥ रामचंद्रः ॥

हो न किंतु नित्यबोधोऽहमिति ज्ञानवशाद्देहादौ निवृत्ताहंममाभिमानः । देहादिनाकृतमकृतं च मयाकृ
तमिति न स्मरति यथा कैवल्यं विदेहकैवल्यं । प्राप्तः कृताकृतं न स्मरति तद्वदित्यर्थः ॥ ६ ॥ आब्रह्मेति
ब्रह्माणं हिरण्यगर्भमारभ्य तृणस्तंब । पर्यंतं जगदहमेवेति ॥ प्रसक्तनिश्चयत्वात् । पुरुषः निर्विकल्पः ॥ २८

संकल्पविकल्पशून्यः अत एव शुचिर्विषयासंगरूपमलरहितः अत एव शांतो निश्चलांतःकरणः अत ए
व प्राप्ताप्राप्तयोरपि विषयोर्निर्वृत्तः परमसंतोषवानात्मानंदपूर्णत्वादित्यर्थः॥७॥ नन्वात्मज्ञानी कथं
निर्विकल्पादिरूपइत्यातंकाह॥ नानेति॥ अधिष्ठानसाक्षात्कारेण ध्वस्तबोधे सति नानाश्चर्यं विश्वं ज
गत्तन किंचित् दृश्यकसत्ताशून्यमिति निश्चयपुरुषः निर्वृत्तवासनः॥ केवलचिद्रूपः सन्न किंचिदि

आब्रह्मस्तंबपर्यंतमहमेवेति निश्चयी॥ निर्विकल्पः शुचिः शांतः प्राप्ताप्राप्तविनिर्वृतः॥७॥ नानाश्चर्य
मिदं विश्वं न किंचिदिति निश्चयी॥ निर्वासनः स्फूर्तिमात्रेन न किंचिदिव शाम्यति॥८॥ राम:॥८॥११॥
इति ज्ञानाष्टकं॥११॥

व विशेषव्यवहारागोचरएव शाम्यति निवृत्तिकार्यकारणोपाधिर्भवति॥ तत्वज्ञानेन सर्वस्यापि स्वप्नव
न्निवृत्तेरित्यर्थः॥८॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां ज्ञानाष्टकसमाप्तं॥११॥ गुरुणोदीरितं
ज्ञानेनान्न किंचिदिव शाम्यति॥ तत्त्वस्मिन्नपाक्षिप्यानुशिष्यो वदति संप्रतं॥ उक्तं ज्ञानाष्टके तन्न किंचिदिव शाम्यती
ति तदेव शिष्यः स्वस्मिन्विशदयन्नुमेवाष्टकमाह॥ तत्र प्रथमं कायवाङ्मनसां व्यापारो परममाह॥

अष्टा०
२६

कायेति । अहं पूर्वमपि कायिकरूपकर्मासहस्ततो हेतोर्वाग्विस्तरसहः जपकर्मासह अर्थान्मनोव्यापाररूपाया तो १
श्चिंतातत्रासहस्तस्माद्धेतोः ॥ एवमेव निर्व्यापार एव अहं आस्थितः आत्मा मस्से न स्थित इत्यर्थः ॥ १ ॥ उक्तव्या
पारत्रयोपरमे हेतुं वदन्नेवोक्तमनुवदति ॥ प्रीत्यभावेनेति ॥ दृष्टिसुफलजनकस्य शब्दादेः शब्दकायक
र्मद्वयस्य प्रीत्यभावेन प्रीत्यविषयत्वेन आत्मनश्चादृश्यत्वेन त्रिविधविक्षेपेभ्यो व्यापारेभ्यः एका

कायकृत्यासहः पूर्वं ततो वाग्विस्तरासहः ॥ अथ चिंतासहस्तस्मादेवमेवाहमास्थितः ॥ १ ॥ प्रीत्य
भावेन शब्दादेरदृश्यत्वेन चात्मनः ॥ विक्षेपैकाग्रहृदय एवमेवाहमास्थितः ॥ २ ॥ रामजी ॥

जनकस्य १
ग्रं हृदयं यस्य स चिक्षेपैकाग्रहृदय इति मध्यमपदलोपी समासः ॥ दृष्टिसुफलजनकजपादेः प्रीत्यविषय
मम त्वाज्जपादिरूपो विक्षेपो नास्ति आत्मनश्चादृश्यत्वाद्ध्यानाद्यविषयत्वाच्चिंतारूपो विक्षेपोपि मे ॥ मम ना
स्तीत्यर्थः ॥ अत एवमेव स्वरूपे ऐव अहमास्थितः ॥ २ ॥ श्री परमात्मने नमः ॥ श्री कृष्णाय नमः ॥ २७

ननु तथापि समाध्यर्थं व्यवहारः कर्तव्य इत्याशंक्य नेत्याह ॥ समाध्यासदिति ॥ कर्तृत्वाभोक्तृत्वाद्यनर्थाध्या
सादिविक्षिप्तौ सत्यां तन्निरासार्थं समाधये व्यवहारो न्यथेति नियमं विलोक्य मुक्तात्मज्ञानिनिम
वी यमसो ध्यासाभा देवमेव समाधिशून्य एवाहमास्थित इत्यर्थः ॥३॥ हेयेति ॥ पूर्णात्मदर्शिनो मम हेयोपादे
यवस्तुनो विरहात् एवममुना प्रकारेण हर्षविषादयोरप्यभावात् हे ब्रह्मन् गुरो अद्य अधुना अहमेवा

सौ समाध्यासादिविक्षिप्तौ व्यवहारः समाधये ॥ एवं विलोक्य नियममेवमेवाहमास्थितः ॥३॥ हे
योपादेयविरहादेवं हर्षविषादयोः अभावादद्य हे ब्रह्मन्नेवमेवाहमास्थितः ॥४॥ आश्रमाना
श्रमध्यानं चित्तस्वीकृतवर्जनात् ॥ विकल्पं मम वीक्ष्यैतैरेवमेवाहमास्थितः ॥५॥ रामजीस

स्थितः ॥४॥ आश्रमेति ॥ आश्रमानाश्रमध्यानं च तथा तत्प्रयुक्तं चित्तस्वीकृतचित्तवर्जनं च एतैस्त्रि
वी भिरेव मम विकल्पं संकल्पविकल्पं दृष्ट्वा अहं एवमेव एतत् त्रितयरहित एवास्थितः ॥५॥ कर्मेति ॥ य
थैव कर्मानुष्ठानमज्ञानात् तथैव उपरमः कर्मोपरमोपि अज्ञानादेव इदं सम्यक् यथार्थतो बुध्वास्म र्प

हमेवमेन कर्म तदुपरमराहित एवास्थितः ॥६॥ अचिंत्यमिति ॥ अचिंत्यं ब्रह्मेति । चिंत्यमानाप्यसौ आ
त्मचिंतालक्षणं रूपं भजति ॥ तस्माद्धेतोस्तद्भावनं अचिंत्यं ब्रह्मेति भावनं त्यक्त्वा अहमेव भावनार
हित एवास्थितः ॥७॥ एवमेवेत्यवस्थायाः साधकोपि श्रेयः किं पुनस्तत्स्वभाव इति कैमुतिकन्याये

कर्मानुष्ठानमज्ञानाद्यथैवोपरमस्तथा । बुध्वा सम्यगिदं तत्त्वमेवमेवाहमास्थितः ॥६॥ अचिंत्यं
चिंत्यमानोपि चिंतारूपं भजत्यसौ । त्यक्त्वा तद्भावनं तस्मादेवमेवाहमास्थितः ॥७॥ एवमेव कृ
तं येन स कृतार्थो भवेदसौ । एवमेव स्वभावो यः स कृतार्थो भवेदसौ ॥८॥ इत्येवमेवाष्टकं ॥ राम ॥ १२

नाह ॥ एवमेवेति ॥ येन एवमेव सर्वक्रियारहितमेव स्वरूपं साधनवशात्कृतं सो सौ कृतार्थो भवेत् यस्तु एव
मेव स्वभावानुसारी सो कृतार्थो भवतीति किं वक्तव्यमित्यर्थः ॥८॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टा
वक्रटीकायामेवाष्टकं समाप्तं ॥ एवमेवेत्यवस्थायाः फलीभूतां सुखस्थितिं ॥ प्राक्शिष्यास्फुटीक
र्तुमाह ॥ आस्ते यथासुखं ॥१॥ अथैवमेवेत्यवस्थायाः फलीभूतां सुखावस्थां स्वकीयां विज्ञादयितुमाह ॥



ORIENTAL INSTITUTE
M. S. UNIVERSITY,
BARODA-(INDIA)

अकिंचनेति ॥ अकिंचनभवं सर्वसंगाभावप्रभवं स्वास्थ्यं चित्तस्थैर्यं कौपीनत्वेपि कौपीनैः सत्त्वाचपि
दुर्लभं । अस्मात्कारणादहं त्यागादाने विहाय त्यागादानयोरासक्तिं विहाय ॥ यथासुखं सुखं मनतिक्र-
म्यासे न कदाचिदुःखी स्यामित्यर्थः ॥१॥ कुत्रापीति ॥ कुत्रापि शरीरकर्मणि कायस्य खेदः ॥ कुत्रापि वैदिके क-
कर्मणि जिह्वा खिद्यते । कुत्रापि ध्यानादिकर्मणि मनः खिद्यति ॥ अतोहं तत्त्रयमपि त्यक्त्वा सुखं य-

अकिंचनभवं स्वास्थ्यं कौपीनत्वेपि दुर्लभं ॥ त्यागादाने विहायास्मादहमासे यथासुखं ॥१॥ कुत्रा-
पि खेदः कायस्य जिह्वा कुत्रापि खिद्यते ॥ मनः कुत्रापि तत्त्यक्त्वा पुरुषार्थे स्थितः सुखं ॥२॥ कृतं
किमपि नैव स्यादिति संचिंत्य तत्त्वतः ॥ यदा यत्कर्तुमायाति तत्कृत्वासे यथासुखं ॥३॥ राम ॥

था स्यात्तथा पुरुषार्थे स्वात्मन्येव स्थितः ॥२॥ ननु कायवाङ्मनोव्यापारत्यागे देह एव सद्यः पतेत् भोजना-
बुपादानादेरपि त्यागादित्याशंक्याह । कृतमिति । शारीरेंद्रियादिभिः कृतं किमपि तत्त्वतो वा तत्त्वात्मकृतं न
य स्यादिति संचिंत्य स[illegible]दा यच्छरीरादिकर्म कर्तुमायाति तद[illegible]हंकारशून्यत्वेन कृत्वा अहं यथासुखमासे ॥३॥
नि ष्ठा ननु कर्मवाने छूमी वा [illegible] कुत्र [illegible] वत्तपंस्वी कायीपुरुषार्थार्थिने सा त्रांशक्याह ॥ कर्मेति ॥ कर्मनैष्कर्म्यनि

अष्टा० बंधरूपाभावात् स्वभावादेहस्थयोगिनः देहासक्तयोगिन एव अहं तु देहसंयोगविरहादपि यथासुखं आ
३१ से तथा च मम देहाद्यासंगाभावात् कर्मनैष्कर्म्यनिर्बंधइत्यर्थः ॥४॥ अथ लौकिकव्यापारेपि मम मनानिर्बं
धइत्याह। अर्थेति। ममस्थित्यादिना साध्यो अर्थानर्थौ नस्तः पूर्णादेत्मवर्ज्जित्वात् तस्माद्नासक्त्यातिष्ठन्
गच्छन् स्वपन् वा अहं यथासुखं आसे ॥५॥ एतदेवमंगपंतरेणाह। स्वपत इति। स्वपतो यत्नरहितस्य मे

कर्मनैष्कर्म्यनिर्बंधभावा देहस्थयोगिनः। संयोगात्संयोगविरहादहमासे यथासुखं ॥४॥ अर्थानर्थौ
न मे स्थित्या गत्या वा शयनेन वा। तिष्ठन् गच्छन् स्वपंस्तस्मादहमासे यथासुखं ॥५॥ स्वपतो ना
स्ति मे हानिः सिद्धिर्यत्नवतो न वा। नाशोल्लासौ विहायास्मादहमासे यथासुखं ॥६॥ सुखादिरूपानि
यमं भावेष्वालोक्य भूरिशः। शुभाशुभे विहायास्मादहमासे यथासुखं ॥७॥ इति यथासुखसप्तकं ।१

मम हानिर्नास्ति यत्नवतस्तवा मम हानिर्नास्ति। अस्मात्कारणात् न्यायालयत्नयोर्नाशोल्लासौ विहाय अहं य
थासुखं आसे ॥६॥ सुखादीति। भवेषु अवतारेषु सुखादिरूपानियमं सुखदुःखादिधर्माणां अनित्यत्वं भू
रिशो बहुषु स्थलेष्वालोक्य अस्मात् सुखाद्यनित्यत्वदर्शनाद्धेतोरहं यथासुखमासे ॥७॥ इति श्री महेश्वर ३१
सिद्धिफलविशेषप्राप्तिः २

विरचितायामष्टावक्रटीकायां यथासुखसमाप्तकं ॥ उदीरितां सुखावस्थां समर्थयितुमात्मनि । प्राह शिष्यः शा
मावस्थां चतुःश्लोक्या गुरुं प्रति ॥ १ ॥ पूर्वं तु गुरुणा यच्छमाष्टकमुक्तं संप्रति तु शिष्यः स्वसुखावस्था समर्थनार्थं
मात्मनः । शमावस्थामाह ॥ प्रकृत्येति ॥ प्रकृत्या स्वभावेन विषयेषु शून्यचित्तः प्रमादादबुद्धिपूर्वकमार
ब्धवज्ञावान् विषयान् भावयति चिंतयतीति भावभावनः कश्चन निद्रितो बोधित इव स यथा निद्राक्षा

प्रकृत्या शून्यचित्तो यः प्रमादाद्भावभावनः ॥ निद्रितो बोधित इव क्षीणसंसरणो हि सः ॥ १ ॥ क्व धना
नि क्व मित्राणि क्व मे विषयदस्यवः ॥ क्व शास्त्रं क्व च विज्ञानं यदा मे गलिता स्पृहा ॥ २ ॥ विज्ञाते साक्षिपु
रुषे परमात्मनि चेश्वरे ॥ नैराश्ये बंधमोक्षे च न चिंता मुक्तये मम ॥ ३ ॥ रामजी सत्य छे ॥ श्रीकृष्णः ।

शून्यचित्तः केनचिद्बोधितत्वात् प्रमादाद्भावभावनः ॥ एवंविधो यः पुमान् विषयेषु शून्यचित्तः स हि निश्चितं क्षीण
संसरणः संसारहेतुविषयानुस्मरणाभावादित्यर्थः ॥ १ ॥ क्व धनानीति । विषयभावनाशून्यस्य पूर्णात्मदर्शिनो मे
लि यदा स्पृहा विषयेच्छा गलिता तदा मे मम धनानि क्व विषयरूपा दस्यवश्चौराः क्व शास्त्रं क्व च विज्ञानमहं ब्रह्मा
स्मीति निदिध्यासनं च क्व धनानि दिविज्ञानांतेष्वपि मम आस्था नास्तीत्यर्थः ॥ २ ॥ विज्ञात इति ॥ देहेंद्रियादीनां साक्षि

अ॰ष्टा॰ पुरुषे त्वंपदार्थे परमात्मनि चेश्वरे तत्पदार्थे विज्ञाते ब्रह्माहमस्मीति साक्षात्कृते सति नित्यनिर्मुक्तचिद्रूपात्म
३२ नानुभवात् मोक्षबंधयोर्निराशये सति मम मुक्त्यर्थं न चिंता ॥ ३ ॥ ननु प्रमादाद्भावभावकः कथं ज्ञांत इत्याशंक्या
ह ॥ अंतर्विकल्पेति ॥ अंतःकरणे विकल्पशून्यस्य बहिर्भ्रांतस्येव स्वच्छंदचारिणः ज्ञानिनो दशास्तादृशा एव ज्ञा
निन एव जानतो ॥ ४ ॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां शिष्यप्रोक्तं शांतिचतुष्टयं ॥ दुर्ल
चतुर्दशं प्रकरणं १४

अंतर्विकल्पशून्यस्य बहिः स्वच्छंदचारिणः ॥ भ्रांतस्येव दशास्तास्तास्तादृशा एव जानते ॥ ४ ॥ इति शां
तिचतुष्टकं ॥ यथातथोपदेशेन कृतार्थः सत्वबुद्धिमान् ॥ आजीवमपि जिज्ञासुः परस्तत्र विमुह्यति ॥ १ ॥
१५

स्वमात्मानस्तत्त्वं प्रत्याययितुमंजसा । मुकुंदस्तत्वोपदेशार्थं गुरु[illegible]राह दयोदधिः ॥ १ ॥ यद्यपि प्रथममात्मतत्त्वोप
देशः कृत एव तथापि तदात्मतत्त्वमंतेवासिभ्यः पुनः पुनरुपदेष्टव्यं दुर्लभत्वात् यथा छांदोग्योपनिष
दि नवकृत्वः श्वेतकेतुं प्रतीत्याचार्यश्रितार्थमसकृदात्मोपदेशं गुरुराह ॥ तत्रादौ ज्ञानाधिकारिणमनधि
तथाह कारिणं च[illegible] ॥ यथातथेति ॥ सत्वबुद्धिमान् शिष्यो यथातथा आपाततोप्युपदेशेन कृतार्थः स्यात् ॥ अत एव कृत
युगे बहुश एवमात्रोपदेशोदपि शिष्याः कृतार्था बभूवुः । परः असत्वबुद्धिर्यावज्जीवं जिज्ञासुरपि बहुधोप ३२

दिष्टोपिविमुमुक्षुरिति यथाविरोचनोब्रह्मणावकुधोपदिष्टोपिमुमोहैवेत्यर्थः ॥१॥ अथबंधमोक्षौसुखोपायेनसंग्र वं
हेणनिरूपयति ॥ मोक्षइति ॥ विषयेष्वनुरागाभावएवमोक्षः विषयेष्वनुरागस्तुबंधइत्यर्थः ॥ एतावदेवबंध
मोक्षयोर्विशिष्टमुक्तंज्ञानं ॥ एवंज्ञात्वात्वंयथेच्छसितथाकुरु ॥२॥ इदंतुविषयवैरस्यंतत्वबोधस्यमित्याह ॥ वा धसा
ग्मीति ॥ अयंप्रसिद्धः ॥ आत्मतत्वाबोधः वाग्मिनंवक्तृचतुरवाक्यभाषिणंमूकंकरोति ॥ प्राज्ञंनानाविद्याविदं

मोक्षोविषयवैरस्यंबंधोवैषयिकोरसः ॥ एतावदेवविज्ञानंयथेच्छसितथाकुरु ॥२॥ वाग्मिप्राज्ञ
महोद्योगंजनंमूकजडालसं ॥ करोतितत्त्वबोधोयमतस्त्यक्तोबुभुक्षुभिः ॥३॥ नत्वंदेहोनतेदे
होभोक्ताकर्त्तानवाभवान् ॥ चिद्रूपोसिसदासाक्षीनिरपेक्षःसुखंचर ॥४॥ श्रीकृष्णायनमः ॥

नंजनंजडंकरोति ॥ महोद्योगंनानाक्रियानुष्ठानशालिनंअलसंनिष्क्रियंकरोति ॥ मनसःश्रत्यकृष्ठवण
नत तयावागादयःकुंठिताभवंतिरहितोभवतीत्यर्थः ॥ यतोयंतत्त्वबोधःवागादीन्कुंठितान्करोति अतो
हेतोर्भोगेच्छुभिः स्वक्तः । अनादृतइत्यर्थः ॥३॥ तत्वबोधसिद्ध्यर्थमुपदिशति ॥ नत्वमिति । त्वंदेहादिरूपो
तेवैते नयतश्चिद्रूपोसि ॥ नापितेदेहसंबंधः ॥ असंगोह्ययंपुरुषइति श्रुतेः ॥ नवाभवान् । कर्त्ताभोक्तायतः ।

अष्टा० ७ ३३ कर्तृभोक्तृप्रभृतीनां सदा साक्षी यो यस्साक्षी स तद्भिन्नः यथा घटसाक्षी घटादित्यर्थः । अतस्त्वं देहतत्संबंधि
षु निरपेक्षः सन् सुखं चरेत्यर्थः ॥ ४ ॥ निरपेक्षत्वमुपपादयितुमाह । रागेति । रागद्वेषौ तु मनोधर्मौ न तु तव
धर्मौ । मनस्तु कदाचिदपि तव संबंधि न भवति ॥ अतस्तदध्यासाज्जाग्रदध्यासे मा कुर्वित्यर्थः ॥ ननु राग
द्वेषौ ममैव धर्मौ कथं तेत्पाशंक्याह ॥ निर्विकल्प इति ॥ यतस्त्वं निर्विकल्पः बोधात्मा ना मित्यतो रागादि चा

रागद्वेषौ मनोधर्मौ न मनस्ते कदाचन ॥ निर्विकल्पोसि बोधात्मा निर्विकारः सुखं चर ॥ ५ ॥ सर्व
भूतेषु चात्मानं सर्वभूतानि चात्मनि ॥ विज्ञाय निरहंकारो निर्ममस्त्वं सुखी भव ॥ ६ ॥ विश्वं
स्फुरति यत्रेदं तरंगा इव सागरे ॥ तत्त्वमेव न संदेहश्चिन्मूर्ते विज्वरो भव ॥ ७ ॥ राम ॥ श्री ॥ राम

चात्मनि विकाररहितः सन् सुखं चरेत्यर्थः ॥ ५ ॥ सर्वेति ॥ सर्वभूतेषु कारणत्वेनानुस्यूतमात्मानं विज्ञाय विभाव्य ॥ स
र्वभूतानि अध्यस्तानीति विभाव्य अहंकारादेः सर्वस्यात्मत्वेनैव स्फुरणात् । अहंममाभिमानरहित
सुखी स्त्वं सुखी भव ॥ ६ ॥ सर्वभूतानि चात्मनीत्येतद्विशदयति ॥ विश्वमिति ॥ यत्रेदं विश्वं सागरे तरंगा इवाधि
ष्ठानाभिन्नं तच्चैतन्यं त्वमेव अतः कारणात् ॥ हे चिन्मूर्ते त्वं विज्वरो भव चिन्मात्रोऽहमित्यनुभवान्वितः

मोहं मौढ्यं अविवेकं माकार्षीरित्यर्थः ८

त्सर्वसंतापो भवेदित्यर्थः ॥ ७ ॥ परमकारुण्यकृतया पुनः पुनर्बोधयति ॥ शृणुष्वेति ॥ शृणुष्व तात शृणुष्व ॥ अत्र चि
द्रूपतायां असंभावनाविपरीतभावनारूपं न कुरुष्व ॥ अत्रेत्युक्तं विशदयति ॥ ज्ञानेति ॥ ज्ञानस्वरूपः प्रकृतेः
परस्त्वं कीदृशस्त्वं भगवान् ॥ तत्पदार्थः ॥ तथा आत्मा त्वंपदार्थः ॥ ८ ॥ गुणैरिति ॥ गुणैरिंद्रियादिभिः संवेष्टि
तो देहः इह लोके तिष्ठति ॥ यथा आयाति तथा किं चित्कालं याति च गच्छति देहादि भिन्न आत्मा न तु गंता
ति इति ।

शृणुष्व तात शृणुष्व नात्र मोहं कुरुष्व भोः ॥ ज्ञानस्वरूपो भगवानात्मा त्वं प्रकृतेः परः ॥ ८ ॥ गुणैः संवे
ष्टितो देहस्तिष्ठत्यायाति याति च ॥ आत्मा न गंता नागंता किमेनमनुशोचसि ॥ ९ ॥ देहस्तिष्ठतु कल्पां
तं गच्छत्वद्यैव वा पुनः ॥ क्व वृद्धिः क्व च वा हानिस्तव चिन्मात्ररूपिणः ॥ १० ॥ त्वय्यनंतमहांभोधौ वि
श्ववीचिः स्वभावतः ॥ उदेतु वास्तमायातु न ते वृद्धिर्न वा क्षतिः ॥ ११ ॥

नाप्यागंता अतो हं ताहं मरिष्यामीत्ये
वमेनं किं शोचसि देहधर्मैरात्मानं माशुचः इत्यर्थः ॥ ९ ॥ नापि देहस्थित्युत्क्रांतिभ्यां तव वृद्धिहानी इत्याह ॥ देह
इति ॥ नित्यचिन्मात्रस्वरूपिणस्तव देहस्थित्या न वृद्धिर्न वा देहनिरस्त्या हानिरित्यर्थः ॥ १० ॥ त्वयीति ॥ विश्वा
ख्या वीचिरपि त्वय्यनंते चित्समुद्रे उदेतु अथवास्तमायातु तावता पि ते न वृद्धिर्न वा क्षतिः ॥ तवानंतत्वादित्य
॥ र्थः ॥ ११ ॥

स्वभावतः अविद्याकामकर्मतः १

हेयम्) किंहेयमुपादेयं

कस्य

अष्टा० ताऽतेति ॥ सर्वस्य त्वद्भिन्नत्वा[illegible] हेयमुपादेयं कथं केनवाप्रकारेण हेयमपादेयं कुत्रवामुपादेयमिस्य न
२४ र्थः ॥ २२ एकस्मिन्निति ॥ एकस्मिन् सजातीयविजातीयस्वगतभेदशून्येऽव्यये शान्ते च ॥ कार्यशून्ये चिदाका
शे निर्मले च सर्वोपाधिशून्ये त्वयि कुतो जन्म कुतश्च कर्म कुतश्चाहंकारः ॥ द्वितीयस्य हेतोरभावात् ॥ अ
व्ययस्य च जन्मासंभवात् ॥ कार्यशून्यस्य च कर्म कर्तृत्वासंभवात् निर्मलस्य चाहंकारादित्यर्थः ॥ २३ ॥ संभवा

तात्तश्चिन्मात्ररूपोऽसि न ते भिन्नमिदं जगत् ॥ अतः कस्य कथं कुत्र हेयोपादेयकल्पना ॥ २२ ॥ एक
स्मिन्नव्यये शांते चिदाकाशेऽमले त्वयि ॥ कुतो जन्म कुतो कर्म कुतोहंकार एव च ॥ २३ ॥ यत्त्वं पश्य
सि तत्रैकस्त्वमेव प्रतिभाससे ॥ किं पृथग्भासते स्वर्णात्कटकांगदनूपुरं ॥ २४ ॥ अयं सोऽहमयं
नाहं विभागमिति संत्यज ॥ सर्वमात्मेति निश्चित्य निःसंकल्पः सुखी भव ॥ २५ ॥ राम ॥ श्री ॥ [illegible]

एकत्वमुपपादयति ॥ यत्त्वमिति ॥ यद्यत्कार्यत्वं पश्यसि ॥ तत्र कारणरूपस्त्वमेव एकः प्रतिभाससे कटकांगदा
दौ स्वर्णवदित्यर्थः ॥ २४ ॥ अयं सोऽहमिति ॥ कारणरूप आत्मैव सर्वमिति निश्चित्य भेदभ्रमं त्यज ॥ तथा च निर्विक
भव ल्पो विगतनानाप्रतिभासः सन् सुखी द्वितीयप्रतिभावाद्धि दुःखं भवतीत्यर्थः ॥ २५ ॥ रामचंद्राय नमः ॥ २४

विभागत्यागे युक्तिमाह ॥ तवैवेति ॥ तवैव अज्ञानतो विश्वं विश्वाकारो विक्षेपः अतः परमार्थतस्त्वमेकः ॥ अ र्य
तः संसा[र्य]संसारी वा त्वत्तो नान्यः कश्चिदित्यर्थः ॥ १६ ॥ भ्रान्तिमात्रमिति ॥ इदं विश्वं भ्रान्तिमात्रसिद्धं अतो हे
हेतोर्न किंचित्तथ्यकसत्तारहितमित्यर्थः ॥ इति निश्चयी अत एव सर्वस्य निरस्तत्वात् निर्वासनः [स्फू]र्तिमा स्फू
त्रो वासनारहितं स्फूर्तिमात्रः सन् न किंचिदिव निरस्ताशेषविशेषः सन् शाम्यति ॥ १७ ॥ एक एवेति ॥ काल

तवैवाज्ञानतो विश्वं त्वमेकः परमार्थतः ॥ त्वत्तोन्यो नास्ति संसारी नासंसारी च कश्चन ॥ १६ ॥ भ्रान्तिमा
त्रमिदं विश्वं न किंचिदिति निश्चयी ॥ निर्वासनः स्फूर्तिमात्रो न किंचिदिव शाम्यति ॥ १७ ॥ एक एव
भवांभोधावासीदस्ति भविष्यति ॥ न ते बंधोस्ति मोक्षो वा कृतकृत्यः सुखं चर ॥ १८ ॥ मा संकल्पविक
ल्पाभ्यां चित्तं क्षोभय चिन्मय ॥ उपशाम्य सुखं तिष्ठ स्वात्मन्यानंदविग्रहे ॥ १९ ॥ रामचंद्राय नमः ॥

त्रयेपि भवांभोधौ एकस्त्वमेव अतस्तव बंधमोक्षौ न स्तः ॥ अतस्त्वं कृतकृत्यः सन् सुखं चर ॥ १८ ॥ मा संकल्पे
ति हे चिन्मय त्वं संकल्पविकल्पाभ्यां चित्तं मा क्षोभय ॥ उपशाम्य ॥ उपरतसंकल्पविकल्पो भव ॥ आनंदस्वरूपे स्वा
त्मनि सुखं तिष्ठ ॥ १९ ॥ ध्यानमपि त्यजेत्याह ॥ त्यजेति ॥ सर्वत्र ध्यानं त्यज ॥ कुत्रापि ध्यानं मा कार्षीरि

अष्टा० त्यर्थः ॥ एतदेव विशदयति ॥ मा किंचिद्धृदि धारयेति ॥ मननमपि त्यजेत्याह ॥ आत्मेति ॥ आत्मा त्वं सदा मुक्त
३५ एवासि ॥ अतो विमृश्य विचार्य किं फलं करिष्यसि नित्यमुक्तत्वादित्यर्थः ॥२०॥ इति श्री मद्विश्वेश्वरविरचि
तायामष्टावक्रटीकायां तत्त्वोपदेशविंशतिकं समाप्तं ॥ पृथक् सत्त्वेन सर्वस्य विस्मृतिर्मुक्तिसाधनं
तृष्णाद्यनर्थविच्छेदद्वारेणोत्यत्र वर्ण्यते ॥१॥ तत्त्वज्ञाने न सर्वप्रपंचस्य पृथक् सत्तया विस्मरणकारिणेः ॥

पंचदशं प्रकरणं १५

त्यजावधानं सर्वत्र मा किंचिद्धृदि धारय ॥ आत्मा त्वं मुक्त एवासि किं विमृश्य करिष्यसि ॥२०॥
इति श्री मद्विश्वेश्वरविरचितायामष्टावक्रटीकायां तत्त्वोपदेशविंशतिकं ॥ आचक्ष्व शृणु
वा तात नानाशास्त्राण्यनेकशः ॥ तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते ॥१॥ रामजी ॥ वि

त वतृष्णापायादिद्वारा मुक्तिर्नान्यथेति ॥ विशेषमुपदिशति ॥ आचक्ष्वेति ॥ हे तात त्वं नानाशास्त्रा
णि अनेकशः अनेकवारं शिष्येभ्यः आचक्ष्व गुरुभ्यो शृणु वा तथापि तव सर्वविस्मरणादृते स्वास्थ्यं
श्रेयो नेत्यर्थः ॥१॥ सुषुप्तौ तु यद्यपि विषयविस्मरणमस्ति तथापि अज्ञानविस्मरणं नास्तीति भा
वः ॥ जीवन्मुक्तस्य तु सर्वस्याध्यस्तत्वानुसंधानरूपं विस्मरणमस्तीति भावः ॥ सर्वविस्मरणे स ३५
ननु सुषुप्तौ सर्वविस्मरणं सर्वेषां विद्यत एव तेन सर्वेषां मोक्षः स्यादत आह तदर्थं संन्यासादि सत्यं २

सूचयन्नाह १

त्ति सर्वस्वरूपवाद्गेपचित्तं निरस्तसर्वाशं भवतीति ॥ भोगमिति ॥ हे चित्त त्वं भोगं कुरु । कर्म वा कुरु ॥ समा
धिं वा कुरु ॥ तथापि चित्तं अत्यर्थं रोचयिष्यति रुचिमुत्पादयिष्यति ॥ कीदृशं चित्तं निरस्तसर्वाशं ॥ स
र्वविस्मरणे सति सर्वाशानुदयादित्यर्थः ॥ २ ॥ दुःखहेतुरयमिति न वेत्ति ॥ अनेनेति ॥ आयासात्स्वपकलो

सर्वत्र स्पृहाविलये सति तुकेनापि कर्मणा दुःखहेतुरायासो न भवतीति सूचयन्नाह ३

भोगं कर्म समाधिं वा कुरु चित्त तथापि ते ॥ चित्तं निरस्तसर्वाशमत्यर्थं रोचयिष्यति ॥ २ ॥ आयासा
त्सकलो दुःखी नैनं जानाति कश्चन ॥ अनेनैवोपदेशेन धन्यः प्राप्नोति निर्वृतिं ॥ ३ ॥ व्यापारे खिद्यते य
स्तु निमेषोन्मेषयोरपि ॥ तस्यालस्यधुरीणस्य सुखं नान्यस्य कस्यचित् ॥ ४ ॥ इदं कृतमिदं नेति द्वंद्वै
र्मुक्तं यदा मनः ॥ धर्मार्थकाममोक्षेषु निरपेक्षं तदा भवेत् ॥ ५ ॥ राम ॥ ॥ श्री ॥ ॥ रामः ॥

दुःखी स्यनेनैवोपदेशेन धन्यः सुकृती निर्वृतिं परमसुखं प्राप्नोति ॥ ३ ॥ व्यापारानासक्तिः सुखहेतुरित्याह ॥
कर्म्मणि व्यापारेति ॥ यः मेषोन्मेषयोरपि व्यापारे खिद्यते ॥ अनासक्तो भवति । तस्यालस्यधुरीणस्य क्रियाभिनिवे
शारहितस्य सुखं नान्यस्य क्रियाभिनिवेशयुक्तस्य ॥ ४ ॥ सर्वत्र स्पृहाविलये सति द्वंद्वहानिरपि भवतीति सू
चयन्नाह ॥ इदं कृतमिति ॥ इदं कृतमिदं नेत्यादि द्वंद्वैर्मुक्तं यदा । मनो भवति तदा पुरुषार्थचतुष्टये त्य
स्याद्यासादेव दुःखी भवति परं तु कश्चन नरं नेन्यात्मा स न जानाति दुःखहेतुरयमिति न वेत्ति ८९

सन् एवमेव रागजप्रवृत्तिद्वेषजनिवृत्तिरहित एव स्थितः ॥ केवलमारब्धवशादेव कदाचित्प्रवर्त्तते ॥ कदाचिन्निवर्त्तते च न तु रागद्वेषवशादित्यर्थः ॥८॥ हातुमिच्छतीति ॥ यस्तु रागी स दुःखजिहासया संसारं हातुमिच्छति ॥ वीतरागस्तु निर्दुःखरागो ऽदुःखरहितत्वात्तस्मिन् संसारे सत्यपि न खिद्यति खेदं न प्राप्नोति ॥९॥ अहं त्यागी मुक्त इत्येवं यस्य मोक्षेऽप्यभिमानो नासौ ज्ञानी तथा अहं योगाभ्यासी देहस्यैव गुणधर्मी धर्मरतः ॥

प्रवृत्तौ जायते रागो निवृत्तौ द्वेष एव हि ॥ निर्द्वन्द्वो बालवद्धीमान्नेवमेव व्यवस्थितः ॥८॥ हातुमिच्छति संसारं रागी दुःखजिहासया ॥ वीतरागो हि निर्दुःखस्तस्मिन्नपि न खिद्यति ॥९॥ यस्याभिमानो मोक्षेऽपि देहेऽपि ममता तथा ॥ न वा ज्ञानी न वा योगी केवलं दुःखभागसौ ॥१०॥ राम ॥

मम देहो बलवानुपवासादिसमर्थ इत्येवं देहेऽप्यभिमानो नासौ योगी न वा ज्ञानी केवलमसौ दुःखभाक् दुःखहेतुत्वहं ममाभिमानानिवृत्तेरित्यर्थः ॥१०॥ सर्वविस्मरणोपदेशमुपसंहरति ॥ हर इति ॥ स्पष्टं ॥११॥ ॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां विशेषोपदेशप्रकरणं ॥ राम ॥१६ षो० उ शं
अथातः श्लोकविंशत्या तत्त्वज्ञस्य दशोच्यते ॥ विज्ञाततत्त्वप्रकर्षस्य व्यक्तये गुरुणा स्फुटं ॥१॥ राम ॥

तुमिष्ठ

 अथान्येषामपिविद्यायांप्रहत्यर्थंतत्त्वज्ञानफलंख्या[illegible]ख्या[illegible]या तत्त्वज्ञदत्त्वांगुरुर्निरूपयति॥ तेनेति॥ ते
नैवज्ञानफलंप्राप्तंयः आत्मन्येवरक्तोन[illegible]भोगादिना॥ अतएवस्वच्छेंद्रियोविषयानासक्तेंद्रियःसन्नए
काकीविषयसंयोगंविनैवनित्यआत्मन्येवरमते॥१॥ नकदाचिदिति। हेनेतिहर्षसंबोधनेहेशिष्यअस्मि
न्जगति। कदाचिदपितत्त्वज्ञोनखिद्यते॥ यतएकेनैवतेनेदंब्रह्मांडमंडलंपूर्णंमान्॥ अतोद्वितीयस्या

हरोयद्गुपदेष्टातेहरिःकमलजोपिवा॥ तथापिनतवस्वास्थ्यंसर्वविस्मरणादृते॥११॥ इतिविशे
१६ षोपदेशः॥ तेनज्ञानफलंप्राप्तंयोगाभ्यासफलंतथा॥ स्वच्छेंद्रियोनित्यमेकाकीरमतेतुयः।
न ॥१॥ नकदाचिज्जगत्यस्मिंस्तत्त्वज्ञोहंतखिद्यते॥ यत्तएकेनतेनेदंपूर्णंब्रह्मांडमंडलं॥२ राम।

भावान्नखिद्यतीत्यर्थः॥२॥ नजात्विति॥ स्वस्मिन्नात्मन्येवरमतेतंस्वारामंज्ञातुकदाचित्॥ अमीविष
यानहर्षयंतितुष्टत्वात् यथासल्लकीपल्लवप्रीतंइभंगजंनिंबपल्लवानहर्षयंति। कटुत्वादित्यर्थः॥ न
॥३॥ रामजीसत्यछे॥ ॥श्री॥ ॥राम॥ ॥श्री॥ ॥राम॥

पृथक्सत्तारहितत्वात२

तु यास्त्विति ॥ यस्य भुक्तेषु भोगेष्वासक्तिर्न भवति । अभुक्तेषु आकांक्षा न भवति । आत्मतृप्तत्वात् तादृशो भवदुर्ल
भः संसारे कोटिष्वेकः इत्यर्थः ॥ ४ ॥ बुभुक्षुरिति । संसारे बुभुक्षुर्मुमुक्षुश्चानेकधा दृश्यंते भोगमोक्षनिराकांक्षी
महति पूर्णे ब्रह्मणि आत्मा योंतष्करणं यस्य स महात्मा यो विरलः ॥ यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत

न जातु विषयाः केऽपि स्वारामं हर्षयंत्यमी ॥ सल्लकीपल्लवप्रीतमिवेभं निंबपल्लवाः ॥ ३ ॥ यस्तु भोगे
व षु भुक्तेषु न भवत्यधिवासितः ॥ अभुक्तेषु निराकांक्षी तादृशो भवदुर्लभः ॥ ४ ॥ बुभुक्षुरिह संसारे मु
मुक्षुरपि दृश्यते ॥ भोगमोक्षनिराकांक्षी विरलो हि महाशयः ॥ ५ ॥ धर्मार्थकाममोक्षेषु जीविते मर
णे तथा । कस्याप्युदारचित्तस्य हेयोपादेयता न हि ॥ ६ ॥ वांछा न विश्वविलये न द्वेषस्तस्य च स्थितौ ॥
त यथा जीविकया तस्माद्धन्य आस्ते यथासुखं ॥ ७ ॥ राम ॥

इति भगवद्वचनात् ॥ ५ ॥ धर्मार्थेति । पुरुषार्थचतुष्ट
ये तथा जीवितमरणयोर्यथायोग्यं हेयोपादेयतारहितो विरल इत्यर्थः ॥ ६ ॥ वांछेति ॥ यस्य तत्त्वज्ञानिनो विश्ववि
लये प्रपंचोपरमे वांछा नास्ति तस्य प्रपंचस्य स्थितौ च द्वेषो नास्ति अधिष्ठानत्वेनैव स्फुरणात् ॥ तस्मात्का
रणाद्धन्यो विद्वान् । आरब्धवशात्प्राप्तव्यायथाप्रयासप्राप्तया जीविकया सुखमनतिक्रम्यैवास्ते इत्यर्थः ॥ ७ ॥

ब्रह्मण्येकरसे निमग्नत्वादुदारचित्तस्तस्माद्विरलः ३

सार्वमन्यत्परित्यज्य बुध्या तन्निष्टतां गतः॥ उपविष्टो व्रजंस्तिष्ठन्नन्मयः स्यात् समाहितवचनात् २

अष्टा० कृतार्थ इति॥ अहं अनेनाद्वैतात्मज्ञानेन कृतार्थ इत्येवं गलितधीः कृतीहरणादिकं कुर्वन्नपि सुखमन भ

३८ स्तिष्ठन्नास्ते॥ कृतार्थत्वधियः सत्वाद्बहिरिंद्रियव्यापारे सत्यपि अज्ञानिवत् क्वचिदपि स्वखेदो न भवतीत्यर्थः॥

॥ शून्येति॥ क्षीणः संसारसागरो यस्य तस्मिन् क्षीणसंसारसागरे पुरुषे स्पृहा विषये क्वापि न॥ विरक्तिर्वा वि

अतः षयविरक्तिश्च न तस्य मनः कार्येंद्रियव्यापारो बालोन्मत्तादिवदित्याह॥ शून्येति॥ तस्य दृष्टिर्मनो व्यापारः शू

कृतार्थो नेन ज्ञानेनेत्येवं गलितधीः कृती॥ पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्नास्ते यथासुखं॥ ८॥
शून्या दृष्टिर्वृथा चेष्टा विकलानींद्रियाणि च॥ न स्पृहा न विरक्तिर्वा क्षीणसंसारसागरे॥ ९॥ न जा
गर्त्ति न निद्राति नोन्मीलति न मीलति॥ अहो परदशा क्वापि वर्त्तते मुक्तचेतसः॥ १०॥ रामजीसस

न्यः संकल्पविकल्परहितः॥ चेष्टा कायव्यापारः वृथा॥ फलमनुद्दिश्यैव॥ तस्य इंद्रियाणि विकलानि॥ पुरःस्थि
तानामपि विषयाणामनिर्णयेत्वात्॥ तदुक्तं यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरिति॥ १॥ न जाग
र्त्तीति॥ ज्ञानी न जागर्त्ति जाग्रदवस्थावान् न भवति॥ अत्र बहिर्विषयानुसंधानानि हेतुमाह॥ नोन्मीलतीति
[redacted]

बुसत्येन २

बाह्यविषयानूनानुसंधत्तेइत्यर्थः॥ तथात्मानीननिद्रातियतः॥ ननिमीलतिजडोन्मत्तवत् अन्यथासर्वान्
विषयान्नूपश्यतीत्यर्थः॥ कातर्हितस्यदशोस्युतआह॥ अहोइति॥ अहोइतिआश्चर्येमुक्तस्यैतस्यकापिग्र
लोकिकीपरदशाकृष्टावस्थातुरीयातीतेत्यर्थः॥२०॥ इदमेवविशदयति॥ सर्वत्रेति॥ सर्वत्रसुखेदुःखे

सर्वत्रदृश्यतेस्वस्थःसर्वत्रविमलाशयः॥ समस्तवासनामुक्तोमुक्तःसर्वत्रराजते॥२१॥ पश्यन्शृ
एवन्स्पृशन्जिघ्रन्नश्नन्गृह्णन्वदन्व्रजन्॥ ईहितानीहितैर्मुक्तोमुक्तएवमहाशयः॥२२॥ ना
निंदतिनचस्तौतिनहृष्यतिनकुप्यति॥ नददातिनगृह्णातिमुक्तःसर्वत्रनीरसः॥२३॥ सानु
रागांस्त्रियंदृष्ट्वामृत्युंवासमुपस्थितं॥ अविह्वलमनास्वस्थोमुक्तएवमहाशयः॥२४॥ एमः॥

=अविकलंमनाः

चस्वस्थचित्तः॥ तथासर्वत्रशत्रौमित्रेचविमलाशयःसमानदर्शीयतःसमस्तविषयवासनाभ्योमुक्तःअतए
वमुक्तःसर्वत्रसर्वासुदशासुराजतेदीप्यतेपूर्णात्मदर्शित्वात्॥२१॥ पश्यन्निति॥ आरब्धवशाद्दर्शनादिकंबहि
रिंद्रियव्यापारंकुर्वन्नपिईहितानीहितैरिच्छाद्वेषैर्मुक्तोमहानाशयोमहतिआत्मनिआशयोयस्यसमहा
शयोमुक्तएवमनोविकारातीतत्वात्॥२२॥ इदमेवविशदयति॥ ननिंदतीतिस्पष्टं॥२३॥ किंचसानुरागमिति॥ सा
नुरागांस्त्रियंदृष्ट्वाअथवासमुपस्थितं॥ मृत्युंदृष्ट्वाअविह्वलमनाः॥ कामभयाभ्यांविमुक्तमनामहाशयोमु
नस्तौतिनहर्षंप्राप्नोति।नकेभ्युकोपंकरोति।त्यथ।कस्मैचिनदीयतेसकस्माचिन्नगृह्णाति। सर्वत्रनीरसःमुक्तःरीत्यर्थः॥

॥ अष्टा ॥ ७९ ॥ टीका

॥१७८॥

अष्टा॰ किंच सुखेति ॥ स्पष्टं ॥ २५ ॥ नहिंसेति ॥ क्षीणसंसरणे अन रे नराग्निमानरहिते विदुषि हिंसा नाम परद्रोह इत्याद
३६ यो मनो विकारा न भवंतीत्यर्थः ॥ २६ ॥ नमुक्त इति ॥ जीवन्मुक्तः विषयद्वेष्टापि न । नचाविषयलोलुपः किं तर्हि
असंसक्तमनाः सन् मारब्धवशात् प्राप्ताप्राप्तं उपाश्नुते भुंक्ते इत्यर्थः ॥ २७ ॥ समाधानेति बूहि[redacted]ो
ःशून्यचित्तो ज्ञानी समाधानादि विविधाः । कल्पनाः नजानाति ॥ तस्मैदृत्ते विदेहकैवल्यं प्राप्त इव ॥ २८ ॥

सुखे दुःखे नरे नार्यां संपत्सु च विपत्सु च ॥ विशेषो नैव धीरस्य सर्वत्र समदर्शिनः ॥ २५ ॥ नहिं
सा नैव कारुण्यं नौद्धत्यं नच दीनता ॥ नाश्चर्यं नैव च क्षोभः क्षीणसंसरणे नरे ॥ २६ ॥ नमुक्तो विष
यद्वेष्टा न वा विषयलोलुपः ॥ असंसक्तमना नित्यं प्राप्ताप्राप्तमुपाश्नुते ॥ २७ ॥ समाधानास व
माधानहिताहितविकल्पनाः ॥ शून्यचित्तो नजानाति कैवल्यमिव संस्थितः ॥ २८ ॥ निर्म ना
मो निरहंकारो ॥ नकिंचिदिति निश्चितः ॥ अंतर्गलितसर्वाशः कुर्वन्नपि न लिप्यते ॥ २९ ॥ श्री

निर्मम इति ॥ अहंममाभिमानशून्यस्तथाधिष्ठानातिरिक्तं किंचिन्न सदिति निश्चयवान् अतएव अंत व्याति
त्रा: गलितसर्वाशोऽतएव कुर्वन्नपि न करोति कर्तृत्वाभिमानरहितत्वादित्यर्थः ॥ २९ ॥ श्रीरामजी ॥ ३९

सविशेषप्रकाशाभावात् ॥ तथा संमोहवर्जितः २

मन इति। गलितं सविशेषवृत्तिहीनं मानसं यस्य सत्तानीकामपि अनिर्वाच्यां दशां संप्राप्तो भवेत्॥ तद्देवदर्श्यति मन इति मनः प्रकाशविवर्जितः प्रत्यक्प्रवणचित्तत्वात् अत एव स्वप्न[redacted]विवर्जितो जडता न
सुषुप्त्या च विवर्जित इत्यर्थः ॥ २० ॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां तत्त्वज्ञस्वरूप
विंशतिकं समाप्तं ॥ तत्त्वाभिज्ञे फलीभूते ग्रमस्यैव प्रधानतां ॥ व्याख्यातुं वर्ण्यते शांतिः शतश्लोके पुनः

मनः प्रकाशसंमोहस्वप्नजाड्यविवर्जितः ॥ दशां कामपि संप्राप्तो भवेद्गलितमानसः ॥ २० ॥
इति तत्त्वज्ञस्वरूपविंशतिकं ॥ यस्य बोधोदये तावत्स्वप्नवद्भवति भ्रमः ॥ तस्मै सुखैकरूपाय न
मः शांताय तेजसे ॥ १ ॥ राम ॥ मत्तदशांप्रकरणं १

स्फुरं। तत्र तावच्छांतेः प्रधानतेति ख्यापयितुं फलीभूतां शांतिं वर्णयितु
कामः शांतिशालिने नमस्करोति ॥ [redacted] यस्येति। बोधोदये सति ता
उ वत्तत्क्षणमेव प्रपंचभ्रमः स्वप्नवत् कोयस्या भवति हा तो भवति तस्मै शांताय निवृत्तसंकल्पविकल्पाय अ
त एव सुखैकरूपाय दुःखाननुविद्धसुखस्वभावाय अत एव तेजसे स्वप्रकाशाय विदुषे नमः ॥ १ ॥ राम ॥

अष्टा०९ ननु धनिनोपि सुखिनो दृश्यंते॥ तत्कथं शांतसंकल्पएव सुखैकरूप इत्याशंक्याह॥ अर्जयित्वेति॥ अखि
५० लानर्थान् धनधान्यं कांतादीनर्जयित्वा पुष्कलान् बहुविधान् भोगानेवाप्नोति न तु सुखैकरूपस्तद्रू
पो दुःखभागित्वात्॥ सर्वपरित्यागमंतरेण सर्वसंकल्पविकल्पत्यागं विना सुखी सुखैकरूपो नहि भवेत्॥
नैव स्यात्॥ २॥ संकल्पविकल्पयोस्तत्त्यागस्तत्त्वज्ञानमेव त्यागमात्रस्य यथा वंध्यापुत्रे तु तत्त्वज्ञानमेव

अर्जयित्वाखिलानर्थान् भोगानाप्नोति पुष्कलान्॥ नहि सर्वपरित्यागमंतरेण सुखी भवेत्॥ २॥
कर्तव्यदुःखमार्तंडज्वालादग्धांतरात्मनः॥ कुतः प्रशमपीयूषधारासारमृते सुखं॥ ३॥ रामः॥

त्यागः॥ असतस्त्यागासंभवात् इदमेव रूपकालंकारेण विशदयति॥ कर्तव्येति॥ कर्तव्यानि यानि क
र्माणि नज्ञातानि दुःखान्येव मार्तंडज्वालाखरतरसूर्यातपस्तेन दग्धः॥ अंतरात्मा मनो यस्य तस्य सं
कल्पप्रशामामृतधारालक्षणं आसारं विना सुखं कुतः स्यात्॥ ३॥ संकल्पप्रशामस्यामृतत्वं संसाररू
पविषनिवर्तकत्वादित्याशयेनाह॥ भवोयमिति॥ अयं भवः भावनामात्रः संकल्पमात्रप्रभवः परमा ५०९

ORIENTAL
M. S. U
BARODA-(INDIA)
...RSITY,

मार्थतश्चात्मव्यतिरिक्तं किंचिन्नास्ति परमार्थतस्तु आत्मैव भावरूपः । ननु स्वभावरूपोपि प्रपंचः कालादि
वशाज्ञावस्वभावरूपस्तं कथमाह ॥ नास्तीति ॥ भावाभावेषु विभाविनां स्थितानां स्वभावानां अभावो नास्ति न
हि तुच्छस्वभावो वह्निः कदाचिदपि शीतलस्वभावो दृष्टः । तथा च मनोराज्यवज्ज्ञावनामात्रसिद्धोऽस्य स्वभा
वः प्रपंचो भावनानिवृत्तौ निवर्त्तत इति संकल्पप्रशमः संसारविषघ्ता पापकृदात्मामृतप्राप्तिहेतुस्त्वामृते ।

भवोयं भावनामात्रो न किंचित्परमार्थतः । नास्त्यभावः स्वभावानां भावाभावविभाविनां ॥ ४ ॥ न
दूरं न च संकोचाल्लब्धमेवात्मनः पदं । निर्विकल्पं निरायासं निर्विकारं निरंजनं ॥ ५ ॥ रामजीसस

मितिभावः ॥ ४ ॥ ननु संकल्पोपरममात्रेण कथमात्मामृतप्राप्तिरित्याशंक्य तस्य नित्यप्राप्तत्वमाह । न दूरमि
त्ति । आत्मनः पदं स्वरूपं दूरं नास्ति नापि संकोचाल्लब्धं वर्त्तते । परिच्छिन्नं नास्ति परिपूर्णत्वात् । अत एवात्मनः
पदं नित्यं लब्धं प्राप्तमेवास्ति संकल्पवशात्तु अप्राप्तमिवाविद्वांसो मन्यंते कंठगतचामीकरवत् । कीदृशं प
दं । निर्विकल्पं विकल्पातीतं विकल्पाभावागम्यं वा । तथा निरायासं आयासातीतं तदभावगम्यं वा । निर्विका

ऽविद्यानावृतहृदयः २

अष्टा० रं विकारातीतं ॥ निरंजनं ॥ उपाधिमलरहितं ॥ ५ ॥ कथं तर्हि तत्त्वज्ञानेन न स्यासिद्धव्यवहारः आत्मकाशज्ञानमित्याशं
४१ कल्पभ्रांतिनाशमात्रादेवेत्याह ॥ व्यामोहेति ॥ ज्ञानेन निरावरणदृष्टयः व्यामोहमात्रस्य प्रपंचभ्रांतिमात्रस्य वि
रतौ समस्यां स्वरूपादानमात्रतः आत्मविश्रांतिमात्रतो वीतशोका विराजंते सर्वदा स्वभावेन संपूर्णाद्वितीयत
याप्रकाशंतेऽस्यार्थः ॥ ६ ॥ आत्मतानरहस्यमाह ॥ समस्तमिति ॥ स्पष्टार्थमिदं ॥ ७ ॥ समस्तं कल्पनामात्रमिति ज्ञा

व्यामोहमात्रविरतौ स्वरूपादानमात्रतः ॥ वीतशोका विराजंते निरावरणदृष्टयः ॥ ६ ॥ समस्तं कल्पना
हि। मात्रमात्मा मुक्तः सनातनः ॥ इति विज्ञाय धीरो हि किमभ्यस्यति बालवत् ॥ ७ ॥ आत्मा ब्रह्मेति नि हं
श्चित्य भावाभावौ च कल्पितौ ॥ निःकामः किं विजानाति किं ब्रूते च करोति किं ॥ ८ ॥ रामजी ॥

नस्य निदानभूतं तत्त्वंपदार्थैक्यज्ञानमाह ॥ आत्मेति ॥ आत्मा त्वंपदार्थः ब्रह्म तत्पदार्थाभिन्न इति निश्चित्य अ
धिष्ठानसाक्षात्काराच्च भावाभावौ घटादितदभावौ कल्पिताविति निश्चित्य तथा च सर्वस्य तुच्छत्वानुसंधानात्का
महेतुविद्याविलयाच्च निष्कामः सन् किं विशिष्टतया जानाति किं ब्रूते किंच कार्यं करोति कर्तृत्वाभिमानरहित

सा
निवृत्तपरागस्य योगिनो योगलक्षणं मनुनोक्तं वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि एकीकृत्य विमुच्येत मुक्तो यं योगउच्यते
इति सु स्वास्तीति योगिनस्तस्य योगिनः २

त्वात् ज्ञातापि न वक्तापि न क्रियाकर्तापि नेत्यर्थः ॥ ८ ॥ सर्वमात्मेति ज्ञानं सर्वकल्पनानिवर्त्तकमित्याह ॥ अय
मिति ॥ सर्वमात्मेति निश्चित्य अनुभूय तूष्णीभूतस्य निवृत्तपरागर्थ्यापारस्य पुंस इति विविधाः कल्पनाः
क्षीणा भवंती ॥ इतीति किं ॥ अहं करोमि यए वाहं पूर्वदिने व्रतमकरवं सोऽहं यजामि ॥ अयं देवदत्तो गच्छति
नाहं गमिष्यामीत्यादयः कल्पनाः क्षीणा भवंतीत्यर्थः ॥ ९ ॥ निवृत्तसंकल्पस्य स्वरूपमाह द्वाभ्यां ॥ न विक्षेप इति ॥

अयं सोहं अयं नाहमिति क्षीणा विकल्पना ॥ सर्वमात्मेति निश्चित्य तूष्णीभूतस्य योगिनः ॥ ९ ॥ न
विक्षेपो न चैकाग्र्यं नातिबोधो न मूढता ॥ न सुखं न च वा दुःखमुपशांतस्य योगिनः ॥ १० ॥ स्वारा
ज्ये भिक्ष्यवृत्तौ च लाभे लाभे जने वने ॥ निर्विकल्पस्वभावस्य न विशेषोस्ति योगिनः ॥ ११ ॥ रामः

उपशांतविकल्पस्य योगिनः विक्षेपो व्यग्रता न ऐकाग्र्यादिकमपि नेत्यर्थः ॥ १० ॥ स्वराज्यइति ॥ स्वा
राज्ये स्वर्गराज्ये भैक्ष्यवृत्तौ भिक्षाटने च प्राप्ते वस्तुलाभे तदलाभे जने जनसमूहे विजने वने च विशेषो योगिनो ना
स्ति ॥ कीदृशस्य विकल्परहितस्वभावस्येत्यर्थः ॥ ११ ॥ क्व धर्म इति ॥ इदं कृतमिदं न कृतमित्यादि द्वंद्वैर्मुक्त
स्य योगिनः ॥ धर्मार्थकामाः ॥ विवेकिता मोक्षोपायभूता विवेकश्च न भवंति ॥ तन्मूलभूताविद्या काम संक

निर्विकल्पस्वभावस्य २

त्यादीनां विनाशादित्यर्थः ॥२२॥ कथं तर्हि जीवन्मुक्तस्य क्रियेत्याशंक्य जीवनादृष्टवशादेवेत्याह ॥ कृतमिति
जीवन्मुक्तस्य योगिनः संकल्पवशात्किमपि कृत्यं नास्ति तथा हृदि मनसि कापि रंजना कोपि अनुरागो नास्ति
तद्धेतुभूताविद्याया अभावात् ॥ तथापि अस्य कृत्यं यथा जीवनं जीवनादृष्टमनतिक्रम्य भवतीत्यर्थः ॥२३॥
क्व मोह इति ॥ संकल्पसीमायामात्मबुद्ध्या विश्रांतस्य मोहादिकं क्व भवति ॥ किं कारणमाश्रित्य भवति ॥ न कि

क्व धर्मः क्व च वा कामः क्व चार्थः क्व विवेकिता ॥ इदं कृतमिदं नेति द्वंद्वैर्मुक्तस्य योगिनः ॥२२॥ कृत्यं कि
मपि नैवास्ति न कापि हृदि रंजना ॥ यथा जीवनमेवेह जीवन्मुक्तस्य योगिनः ॥२३॥ क्व मोहः क्व च वा वि
श्वं क्व तद्ध्यानं क्व मुक्तता ॥ सर्वसंकल्पसीमायां विश्रांतस्य महात्मनः ॥२४॥ येन विश्वमिदं दृष्टं स ना-
स्तीति करोतु वै ॥ निर्वासनः किं कुरुते पश्यन्नपि न पश्यति ॥२५॥ रामाय नमः ॥ रामजी सत्य छे ॥

मपि कारणमाश्रित्य भवति ॥ आत्मबुद्ध्या कारणोपमर्दादित्यर्थः ॥२४॥ येनेति ॥ येन इदं विश्वं घटपटादि दृ
ष्टं स तदाहितसंस्कारः कदाचित् ॥ घटादिकं नास्तीति करोतु वै नास्तीति जानातु यः पश्यन्नपि न पश्यति स नि
र्वासनः सन् किं कुरुते यद्विषयकः संस्कारोपि नास्ति तस्य कर्त्तुमशक्यत्वादित्यर्थः ॥२५॥ येनेति ॥ येन परंब्र

तिरिक्तं ॥ ब्रह्मदृष्टं सच्चाहं ब्रह्मेति चिंतयेत् ॥ यस्तु द्वितीयं न पश्यति स निश्चिंतः सर्वचिंतारहितः सन् किं
चिंतयति ॥ अद्वितीयात्मानुभवशालिनि ब्रह्मचिंतनमपि नास्तीत्यर्थः ॥ तानि नाश्चिन्तननिरोधोपि ना १८
स्तीत्याह ॥ दृष्ट इति ॥ येन आत्मविक्षेपश्चित्तादिभ्रमो दृष्टः ॥ असौ पुरुषश्चित्तनिरोधं कुरुते विक्षेप
परिहारार्थं ॥ उदारः सर्वत्राद्वितीयात्मदर्शी तु विक्षिप्तः एव नास्ति स विक्षेपपरिहारलक्षणस्य साध्यस्या

येन दृष्टं परं ब्रह्म सोहं ब्रह्मेति चिंतयेत् ॥ किं चिंतयति निश्चिंतो द्वितीयं यो न पश्यति ॥ २६ ॥ दृष्टो
येनात्मविक्षेपो निरोधं कुरुते त्वसौ ॥ उदारस्तु न विक्षिप्तः साध्याभावात्करोति किं ॥ २७ ॥ धीरो लो
कविपर्यस्तो वर्त्तमानोपि लोकवत् ॥ न समाधिं न विक्षेपं न लेपं स्वस्य पश्यति ॥ २८ ॥ रामजी ॥

भावात् किं कुरुते कथं निरोधं कुरुत इत्यर्थः ॥ २७ ॥ इदमेव विवृणोति ॥ धीर इति ॥ धीरः अद्वितीयात्मविश्रां
तः लोकविपर्यस्तः लोकेषु विक्षेपरहितः ॥ प्रारब्धवशात् लोकवत् वर्त्तमानोपि बाधितानुवृत्त्या व्यवहा
रपरोपि सन् ॥ अयं समाधिरयं विक्षेपस्तथा अयं विक्षेपकर्त्ता लेपश्चात्मन इत्यादिकं न पश्यति ॥ चि
न्मात्रदर्शित्वात् ॥ २८ ॥ भावाभावेति ॥ यो बुधस्तत्त्वज्ञः स्वात्मानुभवतृप्त अत एव ॥ भावाभावस्फूर्त्तिवि

अष्टा॰ हीनः ॥ अत एव निर्वासनस्तेन लोकदृष्ट्या कुर्वतापि किंचिदपि नैव कृतं स्यात् अकर्त्रात्मज्ञानेन कर्तृत्वा
४३ ध्यासबाधादित्यर्थः ॥ १९ ॥ इदमेव विशदयति ॥ प्रवृत्तो वेति ॥ धीरस्यात्मविश्रांतस्य प्रवृत्तौ वा निवृत्तौ वा
वा दुर्ग्रहः दुराग्रहः कर्तृत्वाभिमानो नास्ति ॥ कीदृशस्य धीरस्य प्रारब्धवशाद्यदा यत्प्रवृत्तं वा निवृत्तं वा कर्तुमाया
यथा ति तत्सुखमनायासं स्यात्तथा कृत्वा तिष्ठतः अतः कर्तृत्वाभिमानाभावात्तज्ज्ञानिना कृतमकृतमेवेत्यर्थः ॥ २० ॥

भावाभावविहीनो यस्तृप्तो निर्वासनो बुधः ॥ नैव किंचित्कृतं तेन लोकदृष्ट्या विकुर्वता ॥ १९ ॥ प्रवृत्तौ
वा निवृत्तौ वा नैव धीरस्य दुर्ग्रहः ॥ यदा यत्कर्तुमायाति तत्कृत्वा तिष्ठतः सुखं ॥ २० ॥ निर्वासनो निरा
लंबः स्वच्छंदो मुक्तबंधनः ॥ क्षिप्तः संस्कारवातेन चेष्टते शुष्कपर्णवत् ॥ २१ ॥ श्री कृष्णाय नमः ॥

ननु ज्ञानि चेन्निर्वासनस्तर्हि केन प्रयुक्तः कर्म करोतीत्याशंक्याह ॥ निर्वासन इति ॥ निर्वासनः अत एव
निरालंबः कर्तव्याकर्तव्यानुसंधानरहितः अत एव स्वच्छंदः रागद्वेषानधीनः यतो मुक्तबंधनः बंधहे
त्वज्ञानशून्यः ज्ञानी संस्कारवातेन क्षिप्तः प्रारब्धपवनेन प्रेरितः सन् शुष्कपर्णवच्चेष्टते ॥ २१ ॥ संसारसं
कल्पादिशून्यस्य सर्वदा संतुष्ट एव स्यादित्याह ॥ असंसारस्येति ॥ न विद्यते संसारहेतुः संकल्पो यस्य तस्यासं ४३

ORIEN… INS… M. S. … IVERSITY, BARODA-(INDIA)

सारस्य हर्षादिकार्ऽकर्मयोन जायं ते तेऽश्रतकर्मिरहितत्वान्निस्पृंशीतलमना विदेहमुक्त इव राजते ॥ षड्भिरि-
तः त्रिव इति स्मृतेः ॥ २२ ॥ कुत्रापीति ॥ आत्मारामस्य अत एव धीरस्य निश्चलचित्तस्य अत एव शीतलः
अच्छतरः निर्मलतरः आत्मा मनो यस्य तस्य शीतलाच्छतरात्मनः ज्ञानिनः कुत्रापि जिहासा त्यागेच्छा नास्ति
उपाधीच्छा नास्ति रागद्वेषाभावात् ॥ नाशोपि अनर्थोपि कुत्रचिन्नास्ति अनर्थहेतोरज्ञानस्याभावादित्यर्थः ॥ २३ ॥ अ

असंसारस्य तु क्वापि न हर्षो न विषादता ॥ स शीतलमना नित्यं विदेह इव राजते ॥ २२ ॥ कुत्रापि न जि-
हासास्ति नाशो वापि कुत्रचित् ॥ आत्मारामस्य धीरस्य शीतलाच्छतरात्मनः ॥ २३ ॥ प्रकृत्या शून्यचि-
त्तस्य कुर्वतोऽस्य यदृच्छया ॥ प्राकृतस्येव धीरस्य न मानो नावमानता ॥ २४ ॥ कृतं देहेन कर्मेदं न म-
या शुद्धरूपिणा ॥ इति चिंतानुरोधी यः कुर्वन्नपि करोति न ॥ २५ ॥ राम ॥ श्री ॥ राम ॥

प्रकृतेपि ॥ प्रकृत्या स्वभावेन शून्यं विकाररहितं चित्तं यस्य धीरस्य आत्मविश्रांतस्य प्राकृतस्येव अज्ञानिन इव यदृच्छया
प्रारब्धवशात् कुर्वतः अस्य विदुषः मानावमानं नास्तीत्यर्थः ॥ २४ ॥ कृतं देहेनेति ॥ इति चिंतां अनुरुध्यते निरंतरं स्मरय-
ति स कुर्वन्नपि न करोति कर्तृत्वाभिमानाभावादित्यर्थः ॥ २५ ॥ अतद्वादीति ॥ जीवन्मुक्तः अतद्वादीव अहमि

अ०ष्टा०८ दं करिष्यामीत्यवदन्नेव कार्यं कुरुते प्रारब्धवशात् ॥ अवदन्नपि वालिशो मूर्खो न भवेत् ॥ अंतर्ज्ञानित्वा
४४ त् ॥ अत एव संसरन्नपि संसारव्यवहारं कुर्वन्नपि आंगरसुखी अत एव श्रीमान् प्रसन्नतया शोभावान् ॥
अत एव शोभिते दीप्यते स्वप्रकाशा इत्यर्थः ॥ २६ ॥ नानेति ॥ नानाविचारान् द्वैतविचारान् सुश्रांत इव निवृ
त्तो यतो धीरो ज्ञानी अत एव आत्मन्येव विश्रांतिमागतः ॥ अत एव न कल्पते संकल्पादिकं मनोव्यापारं न

अतद्वादीव कुरुते न भवेदपि बालिशः ॥ जीवन्मुक्तः सुखी श्रीमान् संसरन्नपि शोभिते ॥ २६ ॥ ना
नाविचारसुश्रांतो धीरो विश्रांतिमागतः ॥ न कल्पते न जानाति न शृणोति न पश्यति ॥ २७ ॥ अस
माधेरविक्षेपान्न मुमुक्षुर्न चेतरः ॥ निश्चित्य कल्पितं पश्यन् ब्रह्मैवास्ते महाशयः ॥ २८ ॥ राम ॥

घ्राणेन न जिघ्रति जिह्वया न लिह्यति ९

करोति ॥ न जानाति ॥ बुद्धिव्यापारं न करोति ग्राह्यं न शृणोति रूपं न पश्यति इंद्रियमात्रव्यापारं करोति
कर्तृत्वाभिमानाभावादित्यर्थः ॥ २७ ॥ असमाधेति ॥ तानि मुमुक्षुर्न भवति ॥ असमाधेः समाधेरकार
णात् ॥ तथा इतरो बद्धो न विक्षेपाद्वैतस्य माभावादित्यर्थः ॥ कादृशास्तिइ ज्ञानी स्यात्कथं आह ॥ निश्चित्येति
इदं सर्वं कल्पितमिति पूर्वमेव निश्चित्य पश्चाद्बाधितमनुवृत्त्या पश्यन्नपि महाशयो निर्विकारचित्तत्वे ४४
न एव ब्रह्मैवास्ते ॥ २८ ॥

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते भगवतवाक्यं

पतृपश्चे ननु संसारं कथं ब्रूषे इत्याशंक्याहंकाराभावादित्याह ॥ यस्येति ॥ यस्यांतःकरणे अहंकाराध्यासः स्यात्स लोक
दृष्ट्याऽकुर्वन्नपि संकल्पादिकं करोति कर्तृत्वाध्यासात् तेन निरहंकारेण अत एव धीरेण कर्तृत्वाध्यास
रहितेन यद्यपि लोकदृष्ट्या कृतं तथापि स्वदृष्ट्या न किंचिदपि कृतं कर्तृत्वाध्यासाभावादित्यर्थः ॥ २९ ॥
मुक्तचित्तं वर्णयति द्वाभ्यां नोद्विग्नमिति ॥ मुक्तस्य चित्तं राजते ॥ केवलप्रकाशरूपमेव यतो नोद्विग्नं दु

यस्यांतः स्यादहंकारो न करोति करोति सः ॥ निरहंकारधीरेण न किंचिदकृतं कृतं ॥ २९ ॥ नोद्वि
ग्नं न च संतुष्टमकर्तृ स्पंदवर्जितं ॥ निराशं गतसंदेहं चित्तं मुक्तस्य राजते ॥ ३० ॥ निर्ध्यातुं चेष्टितुं वापि
यच्चित्तं न प्रवर्त्तते ॥ निर्निमित्तमिदं किंतु निर्ध्यायति विचेष्टते ॥ ३१ ॥

खहेतोर्द्वेषस्याभावात् न च संतुष्टं संतो
षहेत्वनुरागाभावात् तथा अकर्तृ स्पंदवर्जितं संकल्पविकल्पशून्यं ॥ अत एव निराशं यतः संदेहा यस्मा
तत् गतसंदेहं संदेहहेतोरज्ञानस्य नष्टत्वादित्यर्थः ॥ ३० ॥ निर्ध्यातुमिति ॥ यस्य ज्ञानिनः चित्तं निर्ध्यातुं चेष्टि
तुं चेष्टां कर्तुं वापि न प्रवर्त्तते । न संकल्पयति । किंतु इदं ज्ञानिचित्तं निर्निमित्तं संकल्परहितमेव सन् निर्ध्यायति
निश्चिंतं । स्वरूपे तिष्ठति तथा चेष्टते । विविधां चेष्टां करोतीत्यर्थः ॥ ३१ ॥ ज्ञा[illegible]न्यज्ञानिनो[illegible]र्विशेषं च

एकाग्रता एकमेव ध्येयं अन्येयस्य तदेकाग्रं एकाग्रस्य भावः एकाग्रता वा ४

अष्टा॰ ७ दन्नेव ज्ञानिनो विरक्तत्वमाह ॥ तत्त्वमिति ॥ मंदः अज्ञानी यथार्थं तत्त्वं पदार्थाभेदं श्रुतेराकर्ण्य असंभावनावि त
६५ परीतभावनाभ्यां मूढतां अविवेकं प्राप्नोति ॥ अथवा ज्ञातात्मार्थसाक्षात्कारायसंकोचं चित्तसमाधिं आया
ति कोपि सहस्रेष्वेक अंतरसंमूढोपि बाह्यगत्या मूढवत् बहिर्व्यवहारकर्त्ता भवति ॥ ३२ ॥ अथवा याति सं
कोचमित्यनेनोक्तावेकाग्रतानिरोधो दूषयति ॥ एकाग्रतेति ॥ एकाग्रता एकतत्त्वनिष्ठचित्तता अथवा

तत्त्वं यथार्थमाकर्ण्य मंदः प्राप्नोति मूढतां ॥ अथवा याति संकोचममूढः कोपि मूढवत् ॥ ३२ ॥ एका
ग्रता निरोधो वा मूढैरभ्यस्यते भृशं ॥ धीराः कृत्यं न पश्यंति सुप्तवत्स्वपदे स्थिताः ॥ ३३ ॥ अप्रयत्नात्प्रय
त्नाद्वा मूढो नाप्नोति निर्वृतिं ॥ तत्त्वनिश्चयमात्रेण प्राज्ञो भवति निर्वृतः ॥ ३४ ॥ रामचंद्रायनमः ॥

रोधः निश्चित्तविलयो मूढैरनुत्पन्नात्मसाक्षात्कारैर्विपरीतभावनानिवृत्त्यर्थं भृशमत्यर्थमभ्यस्यते सुप्तवत् ॥
सुषुप्तवत् देहात्मधीरहितस्तेनेन स्वपदे स्वस्वरूपे स्थिता धीरा ज्ञानिनस्तु प्रागुक्तं किमपि कृत्यं न पश्यंति अद्वै
तानंदात्मसाक्षात्कारेणैवानंदादिलाभस्य कृतार्थत्वादित्यर्थः ॥ ३३ ॥ निरोधस्याकिंचित्करतामाह ॥ अप्र
यत्नादिति ॥ मूढः पुरुषः अप्रयत्नात् चित्तविरोधात् प्रयत्नात्कर्मानुष्ठानाद्वा निर्वृत्तिं परमं सुखं न प्राप्नोति आ ६५
मुठो प्रल्लात्मैकनिश्चयश्चान्यः ४

नंदहेतोरात्मानंदानुभवाभावादित्यर्थः। प्राज्ञस्तु समाधिं वा कर्म वाप्यकुर्वन् तत्त्वनिश्चयमात्रेण कृतार्थो भव
ति। दुःखहेतोरज्ञानस्य ज्ञानदग्धत्वादित्यर्थः॥३४॥ ननु योगाभ्यासादात्मानुभवो भविष्यतीत्याशंक्याऽऽत्ते सा
हा। शुद्धमिति॥ तत्र जगति अभ्यासपरा जडा अज्ञानिनः आत्मानं न जानंति। कीदृशं शुद्धं मायामलातीतं अ
तएव बुद्धं प्रकाशं प्रियं सुखस्वरूपं पूर्णं यतो निष्प्रपंचं अत एव निरामयं दुःखसंबंधरहितं॥३५॥ इदमेव वि

शुद्धं बुद्धं प्रियं पूर्णं निष्प्रपंचं निरामयं॥ आत्मानं तं न जानंति तत्राभ्यासपरा जडाः॥३५॥ नाप्नोति कर्म
णा मोक्षं विमूढोऽभ्यासरूपिणा॥ धन्यो विज्ञानमात्रेण मुक्तस्तिष्ठत्यविक्रियः॥३६॥ मूढो नाप्नोति तद्ब्र
ह्म यतो भवितुमिच्छति॥ अनिच्छन्नपि धीरो हि परब्रह्मस्वरूपभाक्॥३७॥ राम॥ ॥श्री॥ राम।

वृणोति नाप्नोतीति। विमूढो नात्मनः अभ्यासरूपिणा योगाभ्यासात्मकेन कर्मणा मोक्षं नाप्नोति। न कर्मणा
न प्रजया धनेनेति श्रुतेः॥ धन्यो भाग्यवान् विरलो विज्ञानमात्रेण विक्रियो निरस्ताविद्याकामकर्मा तत एव मुक्तस्ति
ष्ठति॥३६॥ मुमुक्षुरपि मूढो ब्रह्म नाप्नोतीत्याह। मूढ इति। मूढः अज्ञानी यतश्चित्तनिरोधादेर्ब्रह्म भवितुमिच्छति
ततो ब्रह्म नाप्नोति हि निश्चितं धीरो ज्ञानी अनिच्छन्नपि मोक्षमनिच्छन्नपि परब्रह्मस्वरूपभाक् व्यवधायकाज्ञान
॥स्य निवृत्तत्वादित्यर्थः॥३७॥ राम।

ज्ञानेन

अष्टा० एतदेवस्पष्टयति। निराधारेति॥ मूढा अज्ञानिनस्तु निराधाराग्रहव्यग्राः केवलेन चित्तनिरोधेनैवाहं मोक्ष्यामी

४६ तिनिष्कारणदुराग्रहव्यग्राः प्रस्तुतसंसारपोषकाः। संसारनिवर्त्तकत्वात्पराङ्मुखत्वात्॥ बुधैर्ज्ञानिभिस्त्वनर्थ

मूलस्य एतस्य संसारस्य मूलच्छेदः कृतः॥ संसारमूलभूतस्याज्ञानस्य निवृत्तत्वादित्यर्थः॥ ३८॥ न शांतिमिति

मूढो अज्ञानी यतश्चित्तनिरोधादेः शमितुमिच्छति। तत्र शांतिं न लभते॥ धीरो विवेकात्तत्त्वं विनिश्चित्य शमितु

निराधाराग्रहव्यग्रा मूढाः संसारपोषकाः। एतस्यानर्थमूलस्य मूलच्छेदः कृतो बुधैः॥ ३८॥ न शांतिं ल

भते मूढो यतः शमितुमिच्छति॥ धीरस्तत्त्वं विनिश्चित्य सर्वदा शांतमानसः॥ ३९॥ कात्मनो दर्शनं त

स्य यद्दृष्टमवलंबते॥ धीरास्तत्त्वं न पश्यंति पश्यंत्यात्मानमव्ययं॥ ४०॥ रामचंद्राय नमः॥

मनिच्छन्नपि स्वभावादेव सर्वदा शांतमना भवति। चेतोविकारहेतोरज्ञानस्य निवृत्तत्वादित्यर्थः॥ ३९॥ का

त्मन इति। यद्दृष्टं यस्य दृष्टं ज्ञानं अवलंबते दृश्यं विषयीकरोति तस्य आत्मनो दर्शनं क्व न क्वापीत्यर्थः। धीरा

ज्ञानिनस्तं तं तिमिरप्रदीपनादादिकं दृश्यपदार्थं न पश्यंति॥ किंतु चिद्रूपमात्मानं पश्यंति॥ ४०॥ केति

यः अज्ञानी शुष्कचित्तनिरोधे निर्बंधं करोति। तस्य विमूढस्य क्वचिन्न चित्तनिरोधः क्वेन पि अज्ञानी नो समा ४६

ध्यपगमे पुनश्चित्तप्रसरात् स्वारामस्य आत्मारामस्यैव अत एव निश्चलचित्तस्य सर्वदा असौ चित्तनिरोधः अकृ-
त्रिमः स्वाभाविकः सर्वदा स्वात्मानुभवशालित्वात् ॥४१॥ भावस्येति । कश्चिन्नार्किकादि भावस्य भावकः ॥ भावरू-
पपरमार्थसत्स्वरूपं वस्त्विति भावयति मन्यत इति भावकः ॥ अपरः शून्यवादी बौध्यः न किंचिदस्तीति भावयतीति
न किंचिद्भावकः । कश्चित्सहस्रेषु कश्चिदात्मानुभवशाली उभयाभावकः सन् एवमेव उभयाभावनेनैव नि-

कनिरोधो विमूढस्य यो निर्बंधं करोति वै ॥ स्वारामस्यैव धीरस्य सर्वदासावकृत्रिमः ॥४१॥ भावस्य
भावकं कश्चिन्न किंचिद्भावको परः ॥ उभयाभावकः कश्चिदेवमेव निराकुलः ॥४२॥ शुद्धमद्वयमात्मा
नं भावयन्ति कुबुद्धयः ॥ न तु जानन्ति संमोहाद्यावज्जीवमनिर्वृताः ॥४३॥ राम ॥ ॥श्री॥ ॥रामः ॥

९७ राकुलः स्वस्थचित्त आस्ते इत्यर्थः ॥४२॥ न किंचिदपि चिंतयेति भगवद्वचनं सिद्धं तमन्निवेत्याह ॥ शुद्धमिति । कु-
बुद्धयः मूढबुद्धय एव शुद्धं निर्मलं अद्वयं द्वैतवर्जितं आत्मानं अत[illegible]नंतशीलं व्यापकं भावयन्ति चिंतयं-
ति । न तु जानन्ति साक्षात्कुर्वन्ति कुतः । संमोहात् निर्मलत्वस्य कल्पितमलसापेक्षत्वात् अद्वयस्य कल्पितद्वैतसा-
पेक्षेपेक्षत्वात् ॥ आत्मत्वस्य च कल्पितानात्मसापेक्षत्वात् सापेक्षरूपचिंतने न तु मोहानिवृत्तेः ॥ यतो न जानन्ति ॥ अ-
ज्ञा एव यावज्जीवमनिर्वृताः । परमसंतोषरहिताः । संतोषस्य ज्ञानैकलभ्यत्वादित्यर्थः ॥४३॥ इदमेव विशदयति ॥

अष्टा०
४१

मुमुक्षोरनधिगतात्मसाक्षात्कारस्य बुद्धिः सविशेषालंबनमंतरेण न विद्यते ॥ साक्षात्काराभावात् मुक्त
स्य जीवन्मुक्तस्य अत एव मुक्तस्यापि निष्कामबुद्धिः सर्वदा निरालंबैव निर्विशेषात्मानुभवरूपैव । सवि
शेषादिपरित्यागादेवात्मानुभावः ॥४४॥ निरोधोपि विषयस्फूर्तिचकितैरेवानुष्ठीयते न तु विरक्तैरित्याह
विषयेति ॥ विषया द्वीपिनो विषमव्याघ्रान् वीक्ष्य व्याघ्रे द्वीपिनो व्याघ्र इत्यमरः ॥ भीताः शरणार्थिनः स्वा
त्मरक्षणार्थिनो मूढा एव निरोधसिद्धये एकाग्रवृत्तिसिद्धये च ऊटिति शीघ्रं क्रोधं कंदरां ततः प्रदेश

मुमुक्षोर्बुद्धिरालंबमंतरेण न विद्यते ॥ निरालंबैव निष्कामा बुद्धिर्मुक्तस्य सर्वदा ॥४४॥ विषयद्वी
पिनो वीक्ष्य चकिताः शरणार्थिनः ॥ विशंति झटिति क्रोडं निरोधैकाग्र्यसिद्धये ॥४५॥ निर्वासनं हरिं
दृष्ट्वा तूष्णीं विषयदंतिनः ॥ पलायंते न शक्तास्ते सेवंते कृतचाटवः ॥४६॥ रामचंद्रायनमः ॥

विशंतिनतुज्ञानिन इत्यर्थः ॥ वासनात्याग एव विषयभयनिवृत्तिहेतुरित्याह । निर्वासनेति ॥ निर्वासनो
यः पुरुषस्तल्लक्षणं हरिं सिंहं दृष्ट्वा विषयदंतिनो न शक्ताः संतस्तूष्णीं मौनं यथा स्यात्तथा पलायंते ॥ कृ
तचाटवः कृतप्रियवचना इव तं निर्वासनं ईश्वरा कृष्णाः स्वयमागत्य सेवंत इत्यर्थः ॥४७॥ न मुक्तीति ॥ निःशं
कोगतसंशयोऽत एव युक्तमानसो निश्चलमानसः ॥ ज्ञानी मुक्तिकारिकां यमनियमादिक्रियां आश्रित्य ह्य ४१

श्री

अशुभं कर्म वा औदास्यं ३

नाध्यत्ते किं तर्हि कर्तृत्वाध्यासरहितत्वात् यथासुखं आत्मसुखं अनतिक्रम्य लोकदृष्ट्यादिलक्षणादिक्रियां कुर्वन्ना
स्ते इत्यर्थः ॥४७॥ वस्त्विति ॥ वस्तु तत्त्वविदात्मनः श्रवणमात्रेण ज्ञातात्मा शुद्धबुद्धिः अखंडात्मसाक्षात्कारस्ततो नि
राकुलः स्वस्वरूपस्थः पुरुषः आचारं क्रियानुष्ठानं अनाचारं नैःकर्म्यं तु भयं वापि तावदौदास्यं वा एतत्त्रयमपि नै
व प्रपश्यति ॥ आत्मस्थत्वादित्यर्थः ॥४८॥ यदेति ॥ यदा यत् शुभं नैष्कर्म्यं वा अशुभं कर्म वा कर्तुमायाति तल्लोक

न मुक्तिकारिकां धत्ते निःशंको युक्तमानसः ॥ पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्नास्ते यथासुखं
४७ ॥ वस्तुश्रवणमात्रेण शुद्धबुद्धिर्निराकुलः ॥ नैवाचारमनाचारमौदास्यं वा प्रपश्यति ॥४८॥ यदा य
त्कर्तुमायाति तदा तत्कुरुते ऋजुः ॥ शुभं वाप्यशुभं वापि तस्य चेष्टा हि बालवत् ॥४९॥ स्वातंत्र्यात्सुखमा
प्नोति स्वातंत्र्याल्लभते परं ॥ स्वातंत्र्यान्निर्वृतिं गच्छेत् स्वातंत्र्यात्परमं पदं ॥५०॥ रामचंद्राय नमः ॥

प्रारब्धमात्रयत्नानन्तु

२ दृष्ट्वा प्रारब्धवशात् कुरुते ऋजुरग्रहरहितः ॥ हि यतः कारणात्तस्य चेष्टा बालवत् यतो रागद्वेषाधीना ॥४९॥ स्वा
तंत्र्यादिति ॥ स्वातंत्र्यात् रागद्वेषानधीनत्वात् सुखं मनःप्रसादमाप्नोति यतः स्वातंत्र्यात् परं ज्ञानं प्राप्नोति ॥ तथा
स्वातंत्र्यान्निर्वृतिं नित्यसुखं गच्छेत् । प्राप्नुयात् । अतएव स्वातंत्र्यात् परमं पदं स्वरूपविश्रांतिं गच्छेत् ॥५०॥

ज्ञानिनं ४

अष्टा० अकर्तृत्वमिति ॥ यदा स्वात्मनः अकर्तृत्वं मन्यते तदा समस्तचित्तवृत्तयः क्षीणा भवंत्येव ॥ अमुकं कर्माहं करिष्या
९८ मि अमुकं मे भोग्यं भवत्वित्यादिचित्तवृत्त्यनुदये तज्जन्यानामन्यासामपि चित्तवृत्तीनामनुदयादित्यर्थः ॥ ५१ ॥ उ
च्छृंखलेति ॥ धीरस्याज्ञातस्पृहस्य अकृतका अकृत्रिमा उच्छृंखलापि शांतिरहितापि स्थितिः शोभते सस्पृहचित्त
स्य मूढस्य तु कृत्रिमा शांतिर्न शोभत इत्यर्थः ॥ ५२ ॥ निरस्तकल्पनानां तु भोगतत्कांक्षयोरपरिग्रहस्याह ॥ विलसंतीति

अकर्तृत्वमभोक्तृत्वं स्वात्मनो मन्यते यदा ॥ तदा क्षीणा भवंत्येव समस्ताश्चित्तवृत्तयः ॥ ५१ ॥ उच्छृंखला
प्यकृतका स्थितिर्धीरस्य राजते ॥ न तु सस्पृहचित्तस्य शांतिर्मूढस्य कृत्रिमा ॥ ५२ ॥ विलसंति महाभोगै
र्विशंति गिरिगह्वरान् ॥ निरस्तकल्पना धीरा अबद्धा मुक्तबुद्धयः ॥ ५३ ॥ राम ॥ श्री ॥ राम ॥

निरस्तकल्पना धीरा ज्ञानिनः कदाचित्प्रारब्धवशात् महाभोगैर्विलसंति क्रीडंति ॥ कदाचित्प्रारब्धवशात् गि
रिगह्वरान् पर्वतवनानि विशंति किंतु ते अबद्धा आसक्तिरहिताः यतो मुक्तबुद्धयः कर्तृत्वाध्यासरहितबुद्धय इत्य
र्थः ॥ ५३ ॥ श्रोत्रियमिति ॥ धीरस्य ज्ञानिनः श्रोत्रियः देवता तीर्थं पूजने सति हृदि कापि वासना धर्मार्थकामवा मोक्ष
सना न जायते ॥ अंगनां नृपतिं प्रियं पुत्रादिकं च दृष्ट्वा कापि कामादिपदार्थवासना न जायते सर्वत्र समबु ९८

ष्ठित्वादित्यर्थः ॥५३॥ भृत्यैरिति । भृत्यादिभिर्विहस्य उपहस्य धिक्कृतस्तिरस्कृतो योगी मनाक् किंचिदपि विकृतिं वि
तत्कृतो मनो न याति रागद्वेषोर्मिहस्याभावादित्यर्थः ॥५५॥ संतुष्ट इति । लोकदृष्ट्या संतोषादियुक्तोपि वस्तुतस्तद्रहितः ॥
तस्य ज्ञानिनस्तां तामाश्चर्यदशां तादृशा ज्ञानिन एव जानंते ॥५६॥ कर्तव्यतैवेति । कर्तव्यतैव ममेदं कर्तव्यमिति का

श्रोत्रियं देवं तीर्थमंगनां भूपतिं प्रियं । दृष्ट्वा संपूज्य धीरस्य न कापि हृदि वासना ॥५४॥ भृत्यैः पुत्रैः कल
त्रैश्च दौहित्रैश्चापि गोत्रजैः । विहस्य धिक्कृतो योगी न याति विकृतिं मनाक् ॥५५॥ संतुष्टोपि न संतुष्टः
खिन्नोपि न च खिद्यते । तस्याश्चर्यदशां तां तां तादृशा एव जानते ॥५६॥ कर्तव्यतैव संसारो न तां पश्यं
ति सूरयः । शून्याकारा निराकारा निर्विकारा निरामयाः ॥५७॥ अकुर्वन्नपि संक्षोभाद्व्यग्रः सर्वत्र मूढधीः
। कुर्वन्नपि तु कृत्यानि कुशलो हि निराकुलः ॥५८॥

॥ यः संकल्प एव संसारस्तद्धेतुत्वात् । सूरयो ज्ञानिनस्तां कर्तव्य
तां न पश्यंति न संकल्पयंति संकल्पमात्ररहितत्वात् कीदृशाः सूरयः शून्ये सर्वकार्यक्षये तथा वर्तमानघटाद्या न
कारे तथा निराकारे अव्याकृते निर्विकाराः समाः समात्मदर्शिनः अत एव निरामयाः संकल्पो[illegible]वरहिता इत्यर्थः ॥५७
५७॥ अकुर्वन्नपि न विमूढधीः सर्वत्र शून्याकारनिराकारेषु संक्षोभात् संकल्पाद्व्यग्रो भवति ॥ लोकदृष्ट्या कृत्यानि

अ०टी० कुर्वन्नपि कुशलो विद्वान् हि निश्चितं निराकुलत्वनिश्चयलक्षितेनः ॥ आत्मारामत्वात् ॥५८॥ सुखमिति ॥ प्राकृत
५६ वत्सर्वव्यवहारेपि जायमाने शांतधीरात्मनिष्ठबुद्धिर्विद्वान् आत्मसुखमनतिक्रममेव । आस्ते उपविशति
शेते । आगच्छति गच्छति वक्ति भुंक्ते सर्वेंद्रियव्यापारं करोति इत्यर्थः ॥५९॥ ननु ज्ञानिनोपि व्यवहारेषु कथं न खे
दः स्यादत आह ॥ स्वभावादिति ॥ व्यवहारिणोपि यस्य ज्ञानिनः लोकवत् प्राकृतजनवत् ॥ आर्तिः खेदो न जा

सुखमास्ते सुखं शेते सुखमायाति याति च ॥ सुखं वक्ति सुखं भुंक्ते व्यवहारेपि शांतधीः ॥५९॥
स्वभावाद्यस्य नैवार्तिर्लोकवद्व्यवहारिणः ॥ महाह्रद इवाक्षोभ्यो गतक्लेशः सुशोभते ॥६०॥ निवृत्तिरपि
मूढस्य प्रवृत्तिरुपजायते ॥ प्रवृत्तिरपि धीरस्य निवृत्तिफलभागिनी ॥६१॥ राम ॥ ॥श्री॥ ॥राम॥

यते ॥ कुतः स्वभावात् स्वात्मसाक्षात्कृतानंदस्य स्वभावसामर्थ्यादित्यर्थः ॥ स गतक्लेशो ज्ञानी महाह्रद इवाक्षोभ्यो नि
र्विकारः सुशोभते ॥६०॥ निवृत्तिरिति ॥ लोकदृष्ट्या प्रतीयमानापि मूढस्य बाह्येंद्रियव्यापाराणां निवृत्तिः प्र
टी वृत्तिस्वरूपैव जायते ॥ अहंकारा[illegible]नामनिवृत्तत्वात् ॥ धीरस्य ज्ञानिनः लोकदृष्ट्या प्रारब्धवशात् । प्रतीयमानापि
प्रवृत्तिरपि निवृत्तिफलभागिनी मुक्तिपर्यवसायिनी स्यादहंकाराभिमानाभावादित्यर्थः ॥६१॥ राम ॥ ५९

विराग७ परिग्रहेष्विति ॥ मूढस्य देहात्तिमानिनस्तत्संबंधितया परिगृहीतेषु परिग्रहेषु धनवेश्मादिषु प्रायो बाहुल्येन वैरा
ग्यं दृश्यते ॥ देहे विगलितात्मास्य तत्संबंधिनि पुत्रगृहादौ रागः स्यात् ॥ केचित्तु व्याघ्रादौ विरागः स्यात् ॥ देहेरा
गविरागयोरभावे तत्संबंधिषु रागयोर्व्युत्क्रमरोकत्वात् ॥ ६२ ॥ भावनेति ॥ मूढस्य दृष्टिः सर्वदा भावनायां

परिग्रहेषु वैराग्यं प्रायो मूढस्य दृश्यते ॥ देहे विगलितात्मस्य क्व रागः क्व विरागता ॥ ६२ ॥ भावनाभाव
नासक्ता दृष्टिर्मूढस्य सर्वदा ॥ भाव्यभावनया सा तु स्वस्थस्यादृष्टिरूपिणी ॥ ६३ ॥ कृष्णाय नमः ॥

अभावनायां वा आसक्ता अहं भावनां करोमि ॥ यद्वा अहमभावनां करोमीत्यहंकारात् ॥ स्वस्थस्यात्मनि
ष्ठस्य तु सा दृष्टिः भाव्यभावनया दृश्यचिंतया उपलक्षितापि अदृष्टिरूपिणी दृश्यदर्शनरहितरूपैव
स्यात् ॥ अहंकरोमीत्यभिमानाभावादित्यर्थः ॥ ६३ ॥ ननु दृश्यभावने क्रियमाणेपि तद्दृष्टिः कथं दृश्यपाना

अ॰ष्टा॰ त्वं विनीत्याशंक्य निष्कामत्वादित्याह ॥ सर्वारंभेष्विति यो बालवत् निःकामः सन् आकांक्षारहितया सर्वारंभेषु वर
५० त्ति प्रवर्त्तते । तस्य शुद्धस्याहंकारमलवर्जितस्य कर्मणि क्रियमाणे न लेपो न कर्तृता स्यादहंकाराभावादित्यर्थः ॥
६४ ॥ एवंविधो ऽतिधन्य इत्याह ॥ स एवेति ॥ स आत्मत एव धन्यो नान्यः यः सर्वभावेषु समात्मबुद्धिरत एव नि
राम स्तर्षमानसो निर्वृत्तचित्तो भवति ॥ किं कुर्वन् पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् ॥ ६५ ॥ तस्यैव धन्यत्वे यु
स्पृह सन्निस्पृत ५५

सर्वारंभेषु निष्कामो यश्चरेद्बालवन्मुनिः ॥ न लेपस्तस्य शुद्धस्य क्रियमाणेऽपि कर्मणि ॥ ६४ ॥ स एव
धन्य आत्मज्ञः सर्वभावेषु यः समः ॥ पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्निस्तर्षमानसः ॥ ६५ ॥
क्व संसारः क्व चाभासः क्व साध्यं क्व च साधनं ॥ आकाशस्येव धीरस्य निर्विकल्पस्य सर्वदा ॥ ६६ ॥

क्तिमाह ॥ क्वेति ॥ धीरस्य ज्ञानिनः अत एव सर्वदा विकल्परहितस्य संसारं प्रपंचः क्व अत एव तत्प्रतिभा
सश्च क्व अत एव साध्यं स्वर्गादिकं क्व अत एव साधनं यागादिकं च क्व ॥ ६६ ॥ स जयतीति ॥ सत्त्वं अर्थसंन्या
सी दृष्टादृष्टप्रयोजनशून्यो यतः पूर्णः स्वरसः पूर्णस्वभावो विग्रहः स्वरूपं यस्य स पूर्णस्वभावो विग्र ५०
न क्वापि इत्यर्थः

हः स्वरूपं यस्य स पूर्णः स्वरसविग्रहो जयति सर्वोत्कर्षेण वर्त्तते ।। स कः यस्य अकृत्रिमः स्वाभाविकः अनवच्छि-
न्ने पूर्णस्वरूपे समाधिः अनवच्छिन्ने समाधिर्यस्य स वर्त्तते सज्जयतीत्यर्थः ।।६७।। ज्ञाततत्त्वस्य तु सर्वत्र निराकां-
क्षित्वमेव मुख्यं लक्षणमित्याह ।। बहुनेति ।। अत्र ज्ञानिनं बहुनोक्तेन लक्षणेन किं प्रयोजनं ।। ज्ञाततत्त्वो म-
हाशयः भोगमोक्षयोः फलयोर्निराकांक्षी अत एव सदा सर्वत्र भोगमोक्षसाधनेषु नीरसः निरनुरागः ।।६८।।
महाशय त्वं विवरणेति मोगेति।

सज्जयत्यर्थसंन्यासी पूर्णस्वरसविग्रहः ।। अकृत्रिमोनवच्छिन्ने समाधिर्यस्य वर्त्तते ।।६७।। बहु-
नात्र किमुक्तेन ज्ञाततत्त्वो महाशयः ।। भोगमोक्षनिराकांक्षी सदा सर्वत्र नीरसः ।।६८।। महदादि जग-
द्द्वैतं नाममात्रविजृंभितं ।। विहाय शुद्धबोधस्य किं कृत्यमवशिष्यते ।।६९।। रामचंद्राय नमः ।।

महदादीति ।। महद्बुद्धिः महदहंकारः पंचतन्मात्राः पंचमहाभूतभौतिकजगल्लक्षणं द्वैतं नाममात्रेणैव वि-
भिव जृंभतेति विजृंभितं न तु वास्तवं ।। अत एव तत्र कल्पनां विहाय स्थितस्य अत एव शुद्धबोधस्य स्वप्रकाश-
मवशि चिन्मात्रस्वरूपस्य किं कृत्यमवशिष्यते ।। सच्चिदानंदाधिगमेनैव कृतकृत्यत्वादिभावः ।।६९।। ननु तथापि
अनर्थनिवृत्त्यर्थं प्रयत्नः कर्त्तव्य इत्यत आह ।। भ्रममिति ।। अधिष्ठानसाक्षात्कारे सति इदं सर्वं भ्रमभूतं भ्र ति
वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः ३

अष्टा॰ ८ नेलैव कल्पितं अत एव यद्दिदं किंचित्किमपि वास्तवं नास्तीति निश्चयी अलक्ष्यस्फुरणः चिन्मात्रप्रतिभासवान् ॥ अ
५२ त एव शुद्धः स्वरूपसाक्षात्कारेण बाधिताध्यस्तमलत्वात् स्वभावेनैव शांतो नतु शांत्यर्थं ता नातिरिक्तमपे
क्ष्यमित्यर्थः ॥७०॥ शुद्धेति ॥ शुद्धस्फुरणरूपस्य स्वप्रकाशचिद्रूपस्य अत एव दृश्यभावं दृश्यपदार्थमपश्यतः ॥
क्व कुत्र कर्मणि विधिः क्व केषु वा विषयेषु वैराग्यं क्व केषु पदार्थेषु त्यागः क्व केभ्यः पदार्थेभ्यः शमोपि वा कार्यः ॥

भ्रमभूतमिदं सर्वं किंचिन्नास्तीति निश्चयी ॥ अलक्ष्यस्फुरणः शुद्धः स्वभावेनैव शांम्यति ॥७०॥ शुद्धस्फु
रणरूपस्य दृश्यभावमपश्यतः ॥ क्व विधिः क्व च वैराग्यं क्व त्यागः क्व शमोपि वा ॥७१॥ स्फुरतोनंतरूपे
ण प्रकृतिं च न पश्यतः ॥ क्व बंधः क्व च वा मोक्षः क्व हर्षः क्व विषादता ॥७२॥ बुद्धिपर्यंतसंसारे मायामा
त्रं विवर्त्तते ॥ निर्ममो निरहंकारो निष्कामः शोभते बुधः ॥७३॥ राम ॥ ॥ श्री ॥ ॥ रामः ॥

दृश्यपदार्थसेवास्फुरणादित्यर्थः ॥७१॥ चिद्रूपेण प्रकाशमानस्य बंधादिकं नास्तीत्यर्थः ॥७२॥ बुद्धिरात्ममतानमेव
पर्यंतो नाशो यस्य तस्मिन् संसारे मायामात्रं मायासंवलितं चेतन्यतत्त्वं विवर्त्तते । अतात्विकं जगदाकारं प्राप्नोति
अतो बुधो विद्वान् तात्विके शरीरे निरहंकारस्तत्संबंधिनि कलत्रादौ निर्ममः अत एव निष्कामः अत एव शोभते ५२
दीप्यते कामानानानिर्वृतत्वात् ॥७३॥ रामः ॥

अक्षयमिति ॥ अक्षयं अविनाशिनं अत एव संतापरहितं । आत्मानं पश्यतो मुनेः क्व विद्या क्व शास्त्राणीत्यर्थः ॥ क्व
च वा विश्वं क्व च देहः अहं ममेति वा क्व ॥ आत्मातिरिक्तस्य विद्याविश्वादेरस्फुरणादित्यर्थः ॥१४॥ आत्मज्ञानस्य
हेतानर्थनिवृत्तिरित्युक्तं ॥ अज्ञस्य तु चित्तनिरोधादीन्यपि कर्माणि अंजरत्रोचैंप्रायेणेत्याह ॥ निरोधादीनीति अभि
यत्त्वादिजडधीर्निचित्तनिरोधादीनि जहाति तर्हि अतत्क्षणात् अस्मादेव क्षणादारभ्य मनोरथान् प्रलापान्च

अक्षयं गतसंतापमात्मानं पश्यतो मुनेः ॥ क्व विद्या क्व च वा विश्वं देहोहं ममेति क्व वा ॥१४॥ निरोधादी
नि कर्माणि जहाति जडधीर्यदि ॥ मनोरथान् प्रलापांश्च कर्तुमाप्नोत्यतत्क्षणात् ॥१५॥ मंदः श्रुत्वापि त
द्वस्तु न जहाति विमूढतां ॥ निर्विकल्पो बहिर्यत्नादंतर्विषयलालसः ॥१६॥ राम ॥ श्री ॥ राम ॥

सर्वथा सर्वव्यापारान् कर्तुमाप्नोति प्रवर्तते ॥ तथा च मूढस्य चित्तनिरोधादिकमकिंचित्करमित्यर्थः ॥१५॥ मूढ
स्यात्मश्रवणमप्यनर्थकमित्याह ॥ मंद इति ॥ मंदो मूर्खस्तत्त्वात्मवस्तु श्रुत्वापि मूढतां न जहाति ॥ मलिनचि
त्तस्य श्रवणादपि ज्ञानानुदयात् अत एव मूढः यत्नात् बहिर्दृष्टिर्निर्विकल्पोपि अंतर्मनसि विषयलोलुपो भ
वतीत्यर्थः ॥१६॥ रामः ॥

अष्टा० ज्ञानात्तु लोकदृष्ट्या कर्म कुर्वाणोप्यकर्तैवेत्याह ॥ ज्ञानादिति ॥ यः ज्ञानाद्गलितकर्मा गलितक्रियाध्यासः स लोक
५२ दृष्ट्या कर्म कुर्वदपि किंचन कर्तुं वक्तुमेव च अवसरं नाप्नोति ॥ अहं कर्म करिष्यामीति वक्तुमपि अवसरं नाप्नोति
कर्मावसरस्तु दूरापास्त इति भावः ॥ ७७ ॥ विदुषस्तु तमःप्रकाशादिकं न पश्यतीत्याह ॥ क्वेति ॥ धीरस्य ज्ञानिनः अ
त एव निर्विकारस्य निरस्तमोहादिविकारस्य तमः क्व तमसो भावे च तन्निरूप्यः प्रकाशो वा क्व निरातंकस्य का

ज्ञानाद्गलितकर्मा यो लोकदृष्ट्यापि कर्मकृत् ॥ नाप्नोत्यवसरं कर्तुं वक्तुमेव न किंचन ॥ ७७ ॥ क्व तमः क्व
प्रकाशो वा हानं क्व च न किंचन ॥ निर्विकारस्य धीरस्य निरातंकस्य सर्वदा ॥ ७८ ॥ क्व धैर्यं क्व विवेकि
त्वं क्व निरातंकतापि वा ॥ अनिर्वाच्यस्वभावस्य निःस्वभावस्य योगिनः ॥ ७९ ॥ न स्वर्गो नैव नरको
जीवन्मुक्तिर्न चैव हि ॥ बहुनात्र किमुक्तेन योगदृष्ट्या न किंचन ॥ ८० ॥ श्रीकृष्णाय नमः ॥

न्तादिभयशून्यस्य हानं क्व च न कुत्रेत्यर्थः ॥ अनुरागादिशून्यत्वात् चाकिंचन किमपि ज्ञानादि कर्मापि क्व च न कु दा
त्रापीत्यर्थः ॥ ७८ ॥ ज्ञानी त्वनिर्वाच्यस्वभाव इत्याह । क्व धैर्यमिति ॥ योगिनः ज्ञानिनः अत एव निःस्वभावस्य अत ए
व अनिर्वाच्यस्वभावस्य धैर्यं क्व विवेकित्वं च क्व निरातंकता निर्भयतापि क्वेत्यर्थः ॥ ७९ ॥ ज्ञानिदृष्ट्या तु स्वर्गन
किं रकमोक्षादिकं किंचिदपि नास्तीत्याह ॥ न स्वर्ग इति ॥ सुगमः श्लोकः ॥ ८० ॥ ज्ञानिनः स्थितं तु आर्यजनानुतापादिवि ५२

कारहितत्वादमृते नैव परमानंदेनैव पूरितमित्याह । नैवेति । लाभं न प्रार्थयते । अलाभेन सुवर्णाद्यलाभेन नानु
शोचति ॥ अत एव धीरस्य चित्तं अमृतेनैव परमानंदेनैव पूरितं सन् शीतलं आध्यात्मिकादितापरहितमित्य
र्थः ॥ ८१ ॥ उक्तप्रायमेवार्थं पुनरप्युनभंग्या विशेषेण वर्णयति द्वा निंदकायाः सर्वोत्कृष्टत्वख्यापनाय न शांत
मिति ॥ निष्कामोऽविद्याकामकर्महीनो ज्ञानी शांतं शांत्यादिसत्वगुणयुक्तं न स्तौति ॥ नापि दुष्टं निंदति ॥ इमः अष्टा

नैव प्रार्थयते लाभं नालाभेनानुशोचति ॥ धीरस्य शीतलं चित्तममृतेनैव पूरितं ॥ ८१ ॥ न शांतं स्तौ
ति निष्कामो न दुष्टमपि निंदति ॥ समदुःखसुखस्तृप्तः किंचित्कृत्यं न पश्यति ॥ ८२ ॥ धीरो न द्वेष्टि संसा हि
रमात्मानं न दिदृक्षति ॥ हर्षामर्षविनिर्मुक्तो न मृतो न च जीवति ॥ ८३ ॥ निःस्नेहः पुत्रदारादौ निष्कामो
विषयेषु च ॥ निश्चिंतः स्वशरीरेपि निराशः शोभते बुधः ॥ ८४ ॥ राम ॥ श्री ॥ कृष्णः ॥

सन् समदुःखसुखो भवति निष्कामत्वात्किंचित्कृत्यं न पश्यति ॥ ८२ ॥ धीर इति । धीरो ज्ञानी संसारं न द्वेष्टि संसारा
दर्शित्वाद्वाधितानुसंधानाद्वा ॥ तथा आत्मानं न दिदृक्षति अपरोक्षसाक्षात्कारत्वात् । अत एव हर्षामर्षवि
निर्मुक्तस्तथा जीवनमरणादिरहितः सदैकरूपत्वादित्यर्थः ॥ ८३ ॥ निःस्नेह इति ॥ निराशो बुधः शोभते दीप्य
ते ॥ कीदृशः पुत्रदारादौ निःस्नेहः ॥ प्रीतिरहितस्तथा विषयेषु निःकामः भोगेच्छारहितः स्वशरीरेपि भोजनादि
चिंतारहितः ॥ ८४ ॥ राम ॥

चरतः

अष्टा० तुष्टिरिति ॥ धीरस्य ज्ञानिनः यथापतितेन यथाप्राप्तेन वर्त्तते तिष्ठति तस्य यथापतितवर्त्तिनः ॥ सर्वत्र प्राप्ताप्राप्तेस
५३ टि दसत्यसदसत्व निर्वृत्तुरात्म[illegible]तो य एवं तथा स्वच्छंदं अनपेक्षितं प्रारब्धवशात् नाना देशान् विचरतः यत्र
वने वा नगरे वा सूर्योस्तमितस्तत्रैव शायिनः शयनं कुर्वतः ॥ ८५ ॥ पतत्विति ॥ देहः पततु म्रियतां वा अथवा उ
देतु जीवतु वा उभयथापि अस्य ज्ञानिनश्चिंता न भवति । कीदृशस्य स्वभावो नाम निजात्मा स्वरूपं स एव भू
मिस्तत्र विश्रांत्या विस्मृतसमस्तसंसारस्य ॥ ८६ ॥ अकिंचन इति ॥ केवलो निर्विकारो बुधो रमते

तुष्टिः सर्वत्र धीरस्य यथापतितवर्त्तिनः ॥ स्वच्छंदं चरतो देशान् यत्रास्तमितशायिनः ॥ ८५ ॥ पतत्व
त्देतु वा देहो नास्य चिंता महात्मनः ॥ स्वभावभूमिविश्रांतिविस्मृताशेषसंसृतेः ॥ ८६ ॥ अ
किंचनः कामचारो निर्द्वंद्वश्छिन्नसंशयः ॥ असक्तः सर्वभावेषु केवलो रमते बुधः ॥ ८७ ॥ नि
र्ममः शोभते धीरः समलोष्टाश्मकांचनः ॥ सुभिन्नहृदयग्रंथिर्विनिर्धूतरजस्तमः ॥ ८८ ॥ राम ॥

कीदृशः अकिंचनः ॥ नास्ति किंचन परिगृहीतं यस्य सः ॥ अकिंचनः ॥ अत एव कामचारः ॥ विधिनिषेधाकिंकरः ॥
स्वच्छंदचारी अत एव निर्द्वंद्वः सुखदुःखादिशून्यः ॥ छिन्नसंशयः ॥ अद्वैतसंशयशून्यः ॥ सर्वेषु भावेषु विषयेषु अ
सक्तः आसंगशून्यः ॥ ८७ ॥ निर्मम इति ॥ धीरो ज्ञानी शोभते दीप्यते यतो निर्ममः ॥ अत एव समलोष्टाश्मकांच
नः ॥ ज्ञानबलेन सुभिन्नो हृदयग्रंथिरहंकारो यस्य सः ॥ तथा निर्धूतिरजस्तमसी यस्य सः ॥ ८८ ॥ सर्वत्रेति ॥ सर्वत्र ५२
एवेत्यर्थः

स

सर्वेषु विषयेषु अनवधानस्य एकाग्रतारहितस्य तथा न किंचिद्वा[illegible]नः । हृदि मुक्तात्मनः कर्तृत्वाद्यध्यासरहिता
त्मनः ॥ अत एवात्मानंदेन विशेष तृप्तस्य केन तु लना जायते । ज्ञानि व्यतिरिक्तस्य ईदृशास्याभावादित्यर्थः ॥
॥ ९८ ॥ अतुलनामेवं चित्राद्यति ॥ जानन्निति ॥ निर्वासनात् ज्ञानिनः ऋते अन्यः कोन्यो कदृष्टा मनसा जानन्नपि

स सर्वत्रानवधानस्य न किंचिद्वा[illegible]नो हृदि ॥ मुक्तात्मनो वितृप्तस्य तुलना केन जायते ॥ ९८ ॥ जानन्नपि न जा
नाति पश्यन्नपि न पश्यति ॥ ब्रुवन्नपि न च ब्रूते कोन्यो निर्वासनादृते ॥ ९० ॥ भिक्षुर्वा भूपतिर्वापि
यो निष्कामः स शोभते ॥ भावेषु गलिता यस्य शोभनाशोभना मतिः ॥ ९१ ॥ क्व स्वाच्छंद्यं क्व संकोचः क्व वा
तत्वविनिश्चयः ॥ निर्व्याजार्जवभूतस्य चरितार्थस्य योगिनः ॥ ९२ ॥ राम ॥ ॥ श्री ॥ ॥ रामः ॥

वस्तुतो न जानाति तथा चक्षुषा पश्यन्नपि वस्तुतो न पश्यति । ब्रुवन्नपि च न ब्रूते कर्तृत्वाभिमानाभावादित्यर्थः ॥
९० ॥ भिक्षुरिति ॥ यस्य ज्ञानिनः । उत्कृष्टेषु भावेषु शोभना अपकृष्टेषु अशोभनत्वावगाहिनी मतिर्गलिता अत एव
व यो निष्कामः स भूपतिर्वा जनकादिवत् भिक्षुर्वा याज्ञवल्क्यादिवत् शोभत एव भावेषु निर्विकल्पाज्ञानजं तस्य
न बंधायेत्यर्थः ॥ ९१ ॥ क्वेति ॥ योगिनः निर्व्याजमकपटं यदार्जवं ऋजुबुद्धिस्तद्रूपस्यात्मनिष्ठत्वाच्चरितार्थस्य
अन्वर्थनाम्नः स्वाच्छंद्यं स्वेच्छया चारित्वं क्व तथा संकोचं प्रवृत्त्यादि संवरणं क्व तत्वविनिश्चयः क्व कर्तृत्वं वा क्व कर्तृ

ऊ मै ३

अष्टा० त्वाध्यासाभावात् ॥ अतएव निर्व्याजं यदा जीवं वंचक बुध्य भावस्तद्रूपस्य ॥ ९२ ॥ आत्मनि विश्रांत्या स्वस्य तृप्तेन
५४ अतएवाशारहितेन अतएव गतार्तिना गतदुःखेन तानि नायं दंतःकरणे नुभूयेत तत्कथं कं प्रकारं धर्ममा
-१८ श्रित्य कथ्यते प्रकारस्येव धर्मस्याभावात् ॥ कस्य वा अधिकारिणः कथ्यते तादृशाधिकारिणोऽभावा
त् ॥ ९३ ॥ सुप्त इति ॥ धीरं सुषुप्तो न सुप्तः स्वप्ने पि शयितो न जागरे पि न जागर्ति अवस्थावतो बुद्धिर्वस्तुतो या
नत्वात् वद्विविक्तात्मज्ञानं इदमेवाभिप्रेत्याह ॥ पदे पदे क्षणे क्षणे अविरतं निस्यानंदानुभवतृप्तः ॥ ९४ ॥ ज्ञः इति ॥ ज्ञोज्ञा

आत्मविश्रांतितृप्तेन निराशेन गतार्तिना ॥ अंतर्यदनुभूयेत तत्कथं कस्य कथ्यते ॥ ९३ ॥ सुप्तोपि न
सुषुप्तौ च स्वप्नेपि शयितो न च ॥ जागरेपि न जागर्ति धीरः तृप्तः पदे पदे ॥ ९४ ॥ ज्ञः सचिंतोपि नि
श्चिंतः सेंद्रियोपि निरिंद्रियः ॥ सुबुद्धिरपि निर्बुद्धिः साहंकारोनहंकृतिः ॥ ९५ ॥ न सुखी न च वा दुःखी
न विरक्तो न रागवान् ॥ न मुमुक्षुर्न वा मुक्तो न किंचिन्न च किंचन ॥ ९६ ॥ राम ॥ ॥ श्री ॥ ॥ राम

नी ॥ लोकदृष्ट्या चिंतादिसहितोपि वस्तुतस्तद्रहितः विविक्तात्मदर्शित्वात् ॥ ९५ ॥ न सुखीति ॥ लोकगत्या
सुखीत्यादिरूपोपि वस्तुतस्तद्रहित अंतःकरणाध्यासरहितत्वात् न विरक्तो विषयाद्यभावात् न वा मुक्तः पू
र्वमपि बंधनाभावात् ॥ तथा अकिंचित्सदिकरूपत्वात् तथा किंचन न किंचिदपि न च अनिर्वाच्यत्वात् ॥ ९६ ॥

विक्षेपेपीति ॥ धन्यो ज्ञानी लोकदृष्ट्या विक्षेपेपि वर्त्तमानो न विक्षिप्तः स्वप्रकाशात्मानुभवात् ॥ लोकदृष्ट्या समा
धौ प्रतीयमानेपि न समाधिमान् समाधिकर्तृत्वाध्यासाभावात् लोकदृष्ट्या जाड्ये प्रतीयमानेपि न जडः स्वा
नुभवशालित्वात् ॥ लोकदृष्ट्या पांडित्ये प्रतीयमाने न पंडितः पंडितोहमित्यभिमानाभावात् ॥ ५७ ॥ मुक्त इति ॥
मुक्तः प्रारब्धवशाद्यथाप्राप्तः स्थितौ सत्यामपि स्वस्थचित्तः ॥ तथा कृते पूर्वं कृते कर्तव्ये च करिष्यमाणे कर्मणि

विक्षेपेपि न विक्षिप्तः समाधौ न समाधिमान् ॥ जाड्येपि न जडो धन्यः पांडित्येपि न पंडितः ॥ ५७ ॥ मुक्तो
यथास्थितिस्वस्थः कृतकर्तव्यनिर्वृतः ॥ समः सर्वत्र वैतृष्ण्यान्न स्मरत्यकृतं कृतं ॥ ५८ ॥ न प्रीयते वंद्यमा
नो निंद्यमानो न कुप्यति ॥ नैवोद्विजाति मरणे जीवने नाभिनंदति ॥ ५९ ॥ कृष्णः ॥ ॥ श्री ॥ ॥ कृष्णः ॥

निर्वृतः संतुष्टः अनिर्विण्णो उद्वेगशून्यः ॥ अत एव सर्वत्र समः वैतृष्ण्यात् ॥ इदमकृतं इदं च कृतं इति न स्म
रति ॥ ५८ ॥ न प्रीयत इति ॥ केश्चित् स्वस्मिन् वंद्यमानो न तुष्यति निंद्यमानो न कुप्यति मरणे उपस्थिते सति
उद्वेगं न प्राप्नोति आत्मनो नित्यत्वानुसंधानात् ॥ अत एव जीवने सति नाभिनंदति न तुष्यति ॥ ५९ ॥ न
धावतीति ॥ उपशांतधीः पुरुषः जनाकीर्णं प्रदेशं नानुधावति नाप्यरण्यं सर्वत्र शांतत्वात् ॥ यथा त

अ॰टी॰ ५५ थाजनसंमर्देन तदसंमर्दप्रकारेण वा यत्र तत्र वने वा पत्तने वा सम एव स्वस्थचित्त एवावतिष्ठते आ
त्मसाक्षात्कारत्वात् ॥१००॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां शांतिशतकप्रकरणं स
माप्तं ॥ साध्यसाधनरूपेण ज्ञाते ज्ञाने गुरोर्मुखात् ॥ शिष्यः स्वात्मनि विश्रांतिमष्टभिः प्राह सस्फुटं ॥१॥ एवं तत्त्व
ज्ञानिनः स्वभावभूतां शांतिमुक्त्वा स्वकृतार्थतया गुरुं परितोषयन्निजमात्मविश्रांत्यष्टकं शिष्यः स्वयमाह ॥

न धावति जनाकीर्णं नारण्यमुपशांतधीः ॥ यथा तथा यत्र तत्र सम एवावतिष्ठते ॥१००॥ इति शांतश १८
तकं ॥ तत्त्वविज्ञानसंदंशमादाय हृदयोदरात् ॥ नानाविधपरामर्शशल्योद्धारः कृतो मया ॥१॥ क्व
धर्मः क्व च वा कामः क्व चार्थः क्व विवेकता ॥ क्व द्वैतं क्व च वाऽद्वैतं स्वमहिम्नि स्थितस्य मे ॥२॥ रामचंद्रः ॥

रूपसंदंश लोहकारोपकरण

तत्त्वेति ॥ हे गुरो मया भवतः सकाशात् तत्त्वविज्ञानोपदेशमादाय स्वहृदयोदरात् ॥ नानाविधपरामर्श एव यच्छ
ल्यं तस्य उद्धारः अपहारः कृतः ॥१॥ तदेव स्पष्टयति क्व धर्म इति ॥ धर्मार्थकामा अपि हृदयोदरात् निरस्ताः इति
स्फुटत्वादित्यर्थः ॥ स्वमहिम्नि स्थितस्य मे मम विवेकिता क्व द्वैतं वा क्वाद्वैतं वा क्व ॥ चिन्मात्रविश्रांतस्य विवेकानु
पयोगात् ॥ नैर्गुण्ये परे पारे नौकायाः किं प्रयोजनमिति न्यायात् द्वैतस्य च ज्ञानबाधितत्वात् ॥ अद्वैतस्य द्वैतसापे ५५

M. S. UNIVERSITY, BARODA-(INDIA)

भेदा त्वेनास्वाभाविकत्वात् विवेकाद्योपि मम न संतीत्यर्थः ॥२॥ क्वद्वैतमित्युक्तमेव विशेषतः प्रपंचयति ॥
मे क्व भूतमिति ॥ कालस्यापि मम भास्फूर्तेस्तदुपाधिकाः भूतभविष्यवर्त्तमाना अपि न संतीत्यर्थः ॥ नित्यं स्वम
हिम्नि स्थितस्य मम देशोऽपि नास्तीत्यर्थः ॥३॥ अततिव्याप्नोतीत्यात्मा स च व्याप्यमपेक्ष्य कथ्यते स्वमहिम्नि

क्व भूतं क्व भविष्यद्वा वर्त्तमानमपि क्व वा ॥ क्व देशः क्व च वा नित्यं स्वमहिम्नि स्थितस्य मे ॥३॥ क्व चात्मा क्व
च वानात्मा क्व शुभं क्वाशुभं तथा ॥ क्व चिंता क्व च वाचिंता स्वमहिम्नि स्थितस्य मे ॥४॥ क्व स्वप्नः स्व सुषुप्ति
र्वा क्व च जागरणं तथा ॥ क्व तुरीयं भयं वापि स्वमहिम्नि स्थितस्य मे ॥५॥ क्व दूरं क्व समीपं वा बाह्यं वाभ्यंत
रं क्व वा क्व स्थूलं क्व च वा सूक्ष्मं स्वमहिम्नि स्थितस्य मे ॥६॥ क्व मृत्युर्जीवितं वा क्व क्व लोकाः क्वास्य लौकिकं
क्व लयः क्व समाधिर्वा स्वमहिम्नि स्थितस्य मे ॥७॥ राम ॥

॥ स्थितस्य च मम आत्मादिकं नास्ति ॥४॥ क्व स्वप्न इति ॥ स्वप्नादयो बुद्धे
रेवावस्थास्ता मम न संति ॥ एतन्निश्चयाभावे तन्निरूप्यातुरीयावस्थापि मम नास्ति ॥ तथा भयादयोपि तद्धारणधर्मा
मम न संतीत्यर्थः ॥५॥ क्व दूरमिति ॥ सर्वत्र परिपूर्णस्य मम दूरसमीपादिकं नास्ति ॥ पूर्णदर्शिनो मम स्थूलसूक्ष्मदृष्टिर
पि नास्तीत्यर्थः ॥६॥ क्व मृत्युरिति ॥ पालनत्रयेपि रूपस्य मम जीवितमरणे न स्तः ॥ पूर्णमात्रदर्शिनो स्याम मम भूराद

योनसंतिलौकिकंकार्यमपिनास्तिपूर्णस्य ममलब्धोलयः क्व समाधिश्च क्व॥७॥ अलमिति॥ धर्मार्थकामकथया
योगाभ्यासकथयाचालं॥ आत्मविश्रांतस्य मम एतैः प्रयोजनाभावादित्यर्थः॥८॥ इत्यात्मविश्रांत्यष्टकं विवर
णं॥ आत्मविश्रांतस्य निष्पन्नो स्वभावो मुक्तिशालिनां॥ जीवन्मुक्तिदशां शिष्यश्चतुर्दशभिरब्रवीत्॥१॥ आगुरुक्त्या
त्माविश्रांतेः फलीभूतां जीवन्मुक्तिदशां शिष्यश्चतुर्दशश्लोकैर्निरूपयति॥ निरंजने सर्वोपाधिमलशून्ये

इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायामात्मविश्रांत्वप्रकरणमेकोनविंशम् १९

अलं त्रिवर्गकथया योगस्य कथया प्यलं॥ अलं विज्ञानकथया विश्रांतस्य ममात्मनि॥८॥ इत्यात्म
विश्रांताष्टकम्॥ क्व भूतानि क्व देहो वा क्वेंद्रियाणि क्व वा मनः॥ क्व शून्यं क्व च नैराश्यं मत्स्वरूपे निरं
जने॥१॥ क्व शास्त्रं क्वात्मविज्ञानं क्व वा निर्विषयं मनः॥ क्व तृप्तिः क्व वितृष्णत्वं गतद्वंद्वस्य मे सदा॥
२॥ क्व विद्या क्व च वाविद्या क्वाहं क्वेदं मम क्व वा॥ क्व बंधः क्व च वा मोक्षः स्वरूपस्य क्व रूपिता॥३॥

मत्स्वरूपे भूतदेहेंद्रियमनांसि क्व॥ तर्हि किं शून्यमस्ति नेत्याह॥ क्व शून्यमिति॥ नहि सदात्मनि सति शून्यं संभ
वतीत्यर्थः॥१॥ क्वेति॥ सदागतद्वंद्वस्य मे मम शास्त्रं क्व तज्जन्यं विज्ञानं च क्व॥ आत्मविश्रांत्या सर्वस्य गलितप्रा
यत्वात् निर्विषयं मनोपि न तस्यापि गलितप्रायत्वात्॥ अत एव तृप्तिरपि क्व यावत्तृप्तिसाध्यं चित्तं तस्माच्चित्तत्वमपि
न चित्तस्यैव गलितप्रायत्वादित्यर्थः॥२॥ मयि नैराश्यमपि स्वभाविकं न आशानिरूप्यत्वादित्यर्थः॥१॥३

क्व विद्येति॥ मयि क्व विद्या ऽहंकारधर्माः इदं बाह्यं वस्तुजातं॥ क्व मम संबंधः क्व द्वितीयस्य संबंधिनो ऽभावात्
तथा बंधमोक्षावपि धर्मौ क्व अत्र हेतुमाह॥ स्वरूपस्येति॥ निर्विशेषस्वरूपस्य मम रूपिता धर्मवत्त्वं क्व
तथा च निर्मर्धके मयि न विद्यादयो धर्माः संतीति फलितार्थः॥३॥ क्व प्रारब्धेति। प्रारब्धानि कर्माणि तथा

क्व प्रारब्धानि कर्माणि जीवन्मुक्तिरपि क्व वा॥ क्व तद्विदेहकैवल्यं निर्विशेषस्य सर्वदा॥४॥ क्व
कर्त्ता क्व च वा भोक्ता निष्क्रियं स्फुरणं क्व वा॥ क्वापरोक्षं फलं वा क्व निःस्वभावस्य मे सदा॥५॥ क्व
लोकाः क्व मुमुक्षुर्वा क्व योगी ज्ञानवान् क्व वा॥ क्व बद्धः क्व च वा मुक्तः स्वस्वरूपे ऽहमद्वये॥६॥राम

जीवन्मुक्तिस्तथा विदेहकैवल्यं मे ते धर्माः सदा निर्विशेषस्य मे न संतीत्यर्थः॥४॥ क्व कर्त्तेति॥ सदा निःस्वभा
ऽतएव वस्य मे कर्त्तृत्वभोक्तृत्वनिःक्रियस्फुरणानि क्व। अपरोक्षं दृग्निरूपं च ज्ञानं क्व फलं विषयावच्छिन्नं क्व फलं य
चैतत् क्वेत्यर्थः॥५॥ क्व लोक इति॥ अहमित्येवंरूपे द्वये अहमद्वये आत्माद्वैते स्वस्वरूपे सन्ति लोकाः क्व मुमु
क्षुः क्व योगी क्व ज्ञानवान् बद्धः क्व मुक्तः क्वेत्यर्थः॥६॥रामः॥

क्व सृष्टिरिति ॥ अहं मद्वये आत्माद्वैते स्वस्वरूपे सति सृष्टिसंहारो साध्यसाधक सिद्धा वा क्व ॥७॥ क्व प्रमातेति ।
सर्वदा विमलस्योपाधिसंबंधमलशून्यस्य मे प्रमाता प्रमाणप्रमेयं मा संबंधः क्व ॥ मम किंचित्मात्रमप्यतोन्य प्र
स्यदार्थमात्रं क्व ॥ न किंचिद्वा क्व पदार्थाभावोपि मम क्व सर्वथा संबंधशून्यत्वादित्यर्थः ॥८॥ क्व विक्षेप इति ।

क्व सृष्टिः क्व च संहारः क्व साध्यं क्व च साधनं ॥ क्व साधकः क्व सिद्धिर्वा स्वस्वरूपेहमद्वये ७ क्व
प्रमाता प्रमाणं वा क्व प्रमेयं क्व च प्रमा ॥ क्व किंचित् क्व न किंचिद्वा सर्वदा विमलस्य मे ॥८॥ क्व वि
क्षेपः क्व चैकाग्र्यं क्व निर्बोधः क्व मूढता ॥ क्व हर्षः क्व विषादो वा सर्वदा निष्क्रियस्य मे ॥९॥ क्व चैष
व्यवहारो वा क्व च सा परमार्थता ॥ क्व सुखं क्व च वा दुःखं निर्विमर्षस्य मे सदा ॥१०॥ रामजीसस ॥

सदा निर्विमर्षस्य विशेषज्ञानरहितशून्यस्य व्यवहारः व्यवहारि । क्व पदार्थज्ञानं क्व परमार्थताज्ञा
नं च क्व ॥ सुखदुःखादि क्व मपि क्व ॥१०॥ क्व मायेति ॥ सर्वदा विमलस्य उपाधिमलशून्यस्य मम मायासं

सर्वदा निष्क्रियस्य मे विक्षेपादि का क्रिया क्व इत्यर्थः ॥९॥ क्व चैष इति ॥२॥

प्रवृत्तिरिति ॥ कूटस्थस्यात्मनः क्रियस्य तथा निर्विभागस्य भेदरहितस्य सर्वदा स्वस्थस्य मम न प्रवृत्ति
निवृत्ति क मुक्ति र्बंधने च क इत्यर्थः ॥ १२ ॥

सारे प्रीतिर्विरतिश्च वैराग्यं क जीवभावो ब्रह्मभावश्च क । कार्योपाध्यभावे जीवत्वस्य वकुमशक्यत्वात् व्याप्य
वस्तु नाम भावे ब्रह्मत्वस्य च वक्तुमशक्यत्वादित्यर्थः ॥ ११ ॥ क्वोपदेश इति ॥ निरुपाधेरुपाधिशून्यस्य तस्यात्मि
वस्तुनि सानंदरूपस्य उपदेशनक्रिया क उपदेशकं शास्त्रं च क मायाया उपाध्यभावेन कुत उपदेशस्यैवाभा

क्व माया क्व च संसारः क्व प्रीतिर्विरतिः क्व वा ॥ क्व जीवः क्व च तद्ब्रह्म सर्वदा विमलस्य मे ॥ ११ ॥ क्व प्र
वृत्तिर्निवृत्तिर्वा क्व मुक्तिः क्व च बंधनं ॥ कूटस्थनिर्विभागस्य स्थस्य मम सर्वदा ॥ १२ ॥ क्वो स्व
पदेशः क्व च शास्त्रं क्व शिष्यः क्व च वा गुरुः ॥ क्व चास्ति पुरुषार्थो वा निरुपाधेः शिवस्य च ॥ १३ ॥

वार्ते अत एव क्व शिष्यः गुरुश्च क्व ॥ स्वयं शिवस्य रूपस्य च पुरुषार्थो वा क्व चास्ति ॥ १३ ॥ जीवन्मु
क्तिदशामुपसंहरति ॥ क्व चास्तीति ॥ मम अस्तीति न स्फुरति अ सत्वापेक्षत्वात् सत्वस्य तयोर्ना
स्ता स्यापि न स्फुरति ॥ सत्वापेक्षत्वान्नास्तित्वस्य ॥ अत एव मिथः । सापेक्षत्वादेकत्वद्वित्वेपि ममन

अ॰ टी॰ स्तः ॥ प्रत्येकं व्यक्तिभेदे न निषेधस्य कल्पकोटिभिरपि क्वचित् महाकल्पान्तसामान्यत्वेऽप्याह ॥ बकुनेति ॥ ब
५८ कुनानुक्तेन किंप्रयोजनं ॥ मम त्विदेकरूपस्य किंचिदपि नो शिष्टते न प्रकाशान्तरस्यार्थः ॥ १४ ॥ इति श्री
मद्विश्वेश्वरविरचितायामष्टावक्रटीकायां शिष्यप्रोक्तं जीवन्मुक्तचतुर्दशकं समाप्तं ॥ विने

क्व चास्ति क्व च वा नास्ति क्वास्ति चैकं क्व च द्वयं ॥ बकुनात्र मे किं केन किंचिन्नो शिष्टते मम ॥ १
इति शिष्यप्रोक्तं जीवन्मुक्तचतुर्दशक ॥ १० ॥ दशाष्ट चोपदेशेषु श्लोकाः पंचविंशति ॥
सत्यात्मानुभवोल्लासे उपदेशे चतुर्दश ॥ १ ॥ ॥ राम ॥ ॥ श्री ॥ ॥ राम ॥

यद्बुद्धिसौकार्यमुद्दिश्य ग्रंथकर्त्रा यां ॥ श्लोकसंख्यां पुरस्कृत्य प्राहानुक्रमणीं स्फुटं ॥ १ ॥ दशाष्ट
षोडश श्लोकाः शिष्यानुभवोल्लासे द्वितीयप्रकरणेषु ॥ चतुर्दशश्लोकास्तु नेर्गुरूणां क्षेप
मुद्रयोक्तोपदेशाख्ये तृतीयप्रकरणेषु ॥ १ ॥ राम ॥ ॥ श्री ॥ ॥ राम ॥
३ गुरूलोपदेशेषु संति प्रथमे प्रकरणे । पंचविंशतिश्लोकाः २ ५८

षड्उल्लासइति षट् श्लोकाः॥ शिष्योक्तानुभवोल्लासे चतुर्थप्रकरणे स्युः। चत्वारः श्लोका गुरूक्ते लयाख्ये पं
२ चमप्रकरणे स्युः॥ पुनः स्वल्पांतः श्लोका गुरुप्रोक्ते नप्रतिवादिसिद्धलयनिषेधोपदेशाख्ये षष्ठे प्रकरणे
स्युः॥ श्लोकानां पंचकं शिष्यप्रोक्तेनुभवाख्ये सप्तमे प्रकरणे स्यात्॥ श्लोकानां चतुष्कं गुरुप्रोक्ते बंधमोक्षे

३ षड्उल्लासे लये चैव उपदेशे च चतुष्कं तु॥ पंचकं स्यादनुभवे बंधमोक्षे चतुष्ककं॥२॥ निर्विदोपशमा
मे ज्ञाने एवमेवाष्टकं भवेत्॥ यथासुखे सप्तकं च शांतौ स्याद्देदसंमति॥३॥ रामचंद्राय नमः

ष्टमे प्रकरणे स्यात्॥२ निर्वेदोपशमश्चेति॥ श्लोकाष्टकं गुरुप्रोक्ते निर्वेदाख्ये नवमे प्रकरणे स्यात्॥ गु
रुप्रोक्तमुपशमाष्टकं नाम दशमं प्रकरणं गुरुप्रोक्तं ज्ञानाष्टकं नामैकादशं प्रकरणं॥ शिष्यप्रोक्तमेवा
कं नाम द्वादशं प्रकरणं॥ शिष्यप्रोक्तं यथासुखसप्तकं नाम त्रयोदशं प्रकरणं॥ शिष्यप्रोक्तं
शांतिचतुष्कं नाम चतुर्दशं प्रकरणं ३॥ राम॥ ॥श्री॥ ॥रामः॥

अष्टा० तत्वोपदेशइति ॥ विंशंतिश्लोकात्गुरुप्रोक्ते तत्वोपदेशाख्ये पंचदशे प्रकरणे स्मृः ॥ दशश्लोकात्गुरुप्रोक्ते वि
५९ शेषोपदेशाख्ये षोडशे प्रकरणे स्मृः ॥ विंशतिश्लोकात्गुरुप्रोक्तात्तत्त्वस्वरूपोपदेशाख्ये सप्तदशे प्रकरणे स्व
स्मृः ॥ गुरुप्रोक्तं शमसामतकं नामाष्टादशं प्रकरणं ॥४॥ अष्टकं चेति शिष्यप्रोक्तं आत्मविश्रांत्यष्टकं

तत्वोपदेशे विंशच्च दशज्ञानोपदेशके ॥ तत्वस्वरूपे विंशच्चत्वामेच्चशतकं भवेत् ॥४॥ अष्टकं चात्म
त्मविश्रांतौ जीवन्मुक्तौ चतुर्दश ॥ षट् संख्याक्रमविज्ञाने ग्रंथैकात्म्यमतः परं ॥५॥ रामजी ॥ छ ॥

नाम ॥ एकोनविंशप्रकरणं ॥ शिष्यप्रोक्तं जीवन्मुक्तचतुर्दशकं नाम विंशतितमं प्रकरणं ॥ गुरुप्रोक्तं संख्याक्रम
कथनं नामैकविंशप्रकरणं ॥ अतःपरं षट्विंशत्येकमितैः खंडैः श्लोकै ग्रंथैकात्म्यं संख्या ग्रंथखंडानां
चैवैकात्म्यं समरूढरूपतया एकात्मत्वमित्यर्थः ॥५॥ विंशत्येकेति ॥ कियद्भिः खंडैः विंशत्येकमितैः एक ५९

...STITUTE, M.S. U... VERSITY, BARODA-(INDIA)

विंशतिखंडैरित्यर्थः ॥ कियद्भिः श्लोकैः आत्मवेद मध्यखेः जीवात्मपरमात्मभेद भिन्नश्चात्मा द्वौ अग्निस्त्रयः
मध्यखं च मध्येऽस्तु नंवः कानां वामतो गतिरिति न्यायात् ॥ अंते द्वौ मध्ये खं ॥ आदौ त्रयं ॥ ३०२८२ द्याधिकैः
स्त्रिंशत्श्लोकैरित्यर्थः ॥ श्लोकैः संख्यामुपदेशैरेति ॥ अवधूतेति ॥ अवधूतानुभूति रूपोऽयं ग्रंथस्तस्य सं।

विंशत्येकमितैः खंडैः श्लोकैः रात्माग्निमध्यखेः ॥ अवधूतानुभूतेश्च श्लोकसंख्याक्रमोऽस्
मी ॥ ६ ॥ इति अष्टावक्रसंख्याक्रमम् ॥ राम ॥ ॥ श्री ॥ ॥ राम ॥

ख्याक्रमौ विद्योतयेषु येसंख्याक्रमादृहत्रांश्लोका अमी कथिता इत्यर्थः ॥ ६ ॥ इति अष्टावक्री
कायां संख्याक्रम व्याख्यानं समाप्तः ॥ श्रीपरमात्मनेनमः ॥ संवत् १८८६ ना पोष सुदी ॥ ५ ॥ म
गुवासरे चंद्रपुरमध्ये षट्पदज्ञातीय भट पद्माकरात्मजेन गणुभटेन लिखितो यं ग्रंथः ॥ शु ॥

अष्टा०
६०

ORIENTAL INSTITUTE,
M. S. UNIVERSITY,
BARODA-(INDIA)

६०